नोपादेययोरभेदात् अविद्यानिवर्त्तकमपि तत्कार्यानिवर्त्तकमेव ननु औपनिषदमतेऽपि न ज्ञा
नस्य ज्ञानत्वेन कार्यनिवर्त्तकत्वं किंतु तत्तन्निश्चयज्ञानत्वेन संशयादिज्ञानस्य तन्निवृत्तौ स्वरूप

ज्ञानत्वेन अ०

अद्वै.सि.
१९

योग्यत्वादित्यविवेकः॥ अज्ञानत्वाद्यर्थपर्यायोचनया गौणमुख्यन्यायेन वस्तुतो यत्तज्ज्ञानं तन्निव
र्त्यत्वमज्ञानस्य प्रतीयते तच्च स्वप्रकाशब्रह्मरूपं चैतन्यमेवेति च ग्रे वक्ष्यति इत्थं च तु ज्ञानपदवा
च्यापिन सुखं ज्ञानं यथा घटपदवाच्यापि जातिर्घटो न भवति॥ न च ब्रह्मरूपं ज्ञानं तत्तत्पदार्थाव
च्छिन्नमनवच्छिन्नं च सर्वाज्ञानतत्कार्यनिवर्त्तकं वस्तुत एकं तत्तदज्ञानकृतावरणरूपप्रतिबंध
कोऽसति तत्र ज्ञानं सकार्यं नाशयति वृत्त्याद्याकारांतःकरणवृत्तयस्तु तत्त्वैतन्यप्रतिबंधरूपा
ज्ञानकृतावरणविनाशेन चरितार्था इति नाज्ञाननिवर्त्तिकाः कल्प्यंते तथा च तत्तत्पदार्थावच्छिन्नं
ब्रह्मचैतन्यमेव प्रमाणजन्यापरोक्षतत्तदाकारवृत्त्याकृतावरणनिवृत्तिदशायां तत्तदज्ञानं तत्का
र्यसंशयभ्रमं च निवर्त्तयतीति सर्वमपि तत्तत्पदार्थावच्छिन्नं वस्तुस्वरूपं ज्ञानं अज्ञानतत्कार्य
निवृत्तौ स्वरूपयोग्यमेवेति ज्ञानत्वव्यापकं कार्यनिवर्त्तकत्वमविरुद्धं तृतीयं तु दूषयति नापीत्यादिना
स्वस्य बाध्यत्वेनाभिमतस्य यदधिकरणं तत्र विद्यमानयोः संसर्गाभावः तत्प्रतियोगित्वमित्यर्थः॥ अ
भावप्रतियोगित्वं बाध्यत्वमित्युक्ते पूर्वपक्षिणः सत्यतिव्याप्तिः स्यात्तस्यापि देशांतरवृत्त्यसंसर्गाभाव
प्रतियोगित्वात् तदभावं विशिनष्टि स्वाधिकरणवृत्तीति॥ बाध्यत्वनिर्वचनफलमाह तदस्यादि

त्वेन अज्ञानत ४

रामः
१९

धि
तिनेत्यत्र हेतुमाह॥ संयोगादेरिति संयोगस्याव्याप्यवृत्तित्वेन तदभावस्य तदधिकरणैकदेशे विद्य
मानत्वात्तत्र बाध्यत्वलक्षणाति व्याप्तिरित्यर्थः॥ तत्र बाध्यत्वरूपमसत्त्वमिष्टमिति चेन्नेत्या
ह तदधीनेति प्रपंचस्य संयोगाधीनत्वं संयोगासमवायिकारणकत्वं न हि कल्पितं तु तद्रूपजन्यपट
रूपं पारमार्थिकं दृष्टं लोके॥ सिद्धांतेऽवयवसमुदायातिरिक्तावयविनो निराकरिष्यमाणत्वेन तत्र
द्व्यवयवमात्रवृत्तिसंयोगस्याव्याप्यवृत्तित्वात्संयोगतदभाववविशिष्टयोरेकाधिकरणवृत्तित्वकल्प
नाच॥ परमत इत्युक्तं संयोगस्यासत्त्वापत्तेर्विशेषणं तत्र पक्षेऽपि पक्षसुच्छाप्यादोषमाह एका
वच्छेदेनेति अवच्छिद्यतेऽनेनेत्यवच्छेदः प्रदेशविशेषः तेन रूपेण स्वाधिकरणवृत्तिर्योऽत्यंताभा
वः तथा च स्वेन सह कस्मिन् प्रदेशे एकदावृत्तिर्योऽभावस्तत्प्रतियोगित्वमित्यर्थः॥ अ सम्यक्
पञ्चेति॥ शुक्तिकायामनुभूयमानं रजतं शुक्तिनिष्ठरजतात्यंताभावप्रतियोगित्वमनुभूयदन्यतुष्व
दाहरणवाध्यमित्यर्थः यत्र घटोनुभूयते तत्र कालांतरीयवृत्तमानात्यंताभावप्रतियोगी घटोपि
भवतीति सोपि बाध्यः स्यादत स्वदेति वर्त्तमानविशेषणं वर्त्तमानपदं क्षितिपरं न च घटतदभावयो
र्वाविघटानुभवतदभावयोरपि विरोधोऽस्तित्वमभावोच्छेदप्रसंगादिति पूर्वपक्षिणो हृदयं न चे

[illegible]
[illegible]

असंभवादिति भावाभावयोरेकदैकत्रविरोधादित्यर्थः; तथा च बाध्यत्वरूपप्रतियोगिनोऽसंभवादसंभविसहलक्षणमिति भावः
असंभवपरिहारार्थं प्रकारांतरेणाबाध्यत्वलक्षणमाशंक्य दूषयति न चेत्यत्रेति

अद्वै० टी० न्यत्र हेतुमाह प्रपंचमात्र इति ॥ अन्यथाख्यातीति ख्यात्यंतराभाववति ख्यासमानत्वसंभवेन सर्व
२० स्य बाध्यरूपासत्वापत्त्या तदन्यत्वरूपसत्वलक्षणासंभव इति भावः ॥ यत्र न्यूनत्वादोयस्मिन्नुका
लेयस्य बाधत्वराहित्यं तत्र तदा तस्य सत्वमिति विवक्षितत्वात्

राम० २०

नासंभव इत्याशंक्य परिहरति तत्र तदेति तथा च भ्रमविषयस्य घटादेः भ्रमाधिकरणे तत्काले वा सत्वेपि भ्रमाविषयस्य
तस्यैव प्रमाविषयरूपेधिकरणे तत्काले च बाध्यत्वराहित्यमिति नासंभवः स च लक्षणस्येति भावः ॥ निरुपाधीति प
रिहारः घटः सन् पटः सन्निति देशकालविशेषानालिंगितसत्प्रतीतिर्निरुपाधिसत्प्रतीतिः देशकालविशेषयोः सत्व
पदार्थालर्वाग्विस्त्रीकारे तदनालिंगित घटः सन्निति सार्वत्रिकप्रतीतेर्विना बाधं त्यागं तु कल्पितस्यादिति भावः । अबाध्यत्वस
त्वमिति पक्षे प्रथमविकल्पद्वयसाधारणं दूषणमाह वर्त्तमानेति किंत्र तीतिकालीनबाधरहितत्वं सत्वं त्रैकालिक
बाधरहितत्वं वा आद्ये शुक्तिरजताद्यावति व्याप्तिः नहि शुक्तिरजतादि भ्रमकाले कश्चित्तदभावं तदधिष्ठानशुक्तिकांबा
ध्य भ्रमिणोति तथा चाबाध्यत्वलक्षणस्यातिव्याप्तिः द्वितीये त्रैकालिकबाधाभावः अप्रत्यक्षो बाधस्य तो वा नघः सन् घ
ट इत्ति ज्ञानस्य सत्वविषयकस्य चक्षुराद्यन्वयव्यतिरेकानुविधायिनः प्रत्यक्षत्वस्य सर्वसंमतत्वात् द्वितीये प
क्षत्रयस्य साधारणं दूषणमाह । त्रैकालिकेति तदभावस्य बाधाभावस्य प्रत्यक्षत्वेति । प्रत्यक्षसहकारिण्या योग्या
नुपलब्धेरभावात् त्रिविध्यत्कालवर्त्तिनो बाधस्य प्रत्यक्षायोग्यत्वेन तदनुपलब्धेरप्ययोग्यत्वात् ॥ योग्यप्र
तियोगिकानुपलब्धेरेव योग्यानुपलब्धित्वस्य सिद्धान्तिमतत्वात् । न तथा प्रत्यक्षगोचरीभूतं सत्वं कालत्रया
बाध्यत्वरूपं न संभवतीति भावः । किंच भूतलादिकालास्फुरणेपि अखंडसत्वस्फुरणात् न तद्भिन्नं सत्वमिति च
कारेण सूचयति । सत्तायाः प्रपंचस्वरूपत्वपक्षे तद्धर्मत्वपक्षे च निराकृत्य भूतियुक्तिः त्यांसाधितं स्वपक्ष

प्रतियोगिनः योग्यत्वं नाम अभावग्राहकेन्द्रियग्राह्यत्वं ३

मुपसंहरति तस्मादिति पूर्वोक्तयुक्तिभिः पक्षांतरासंभवस्तस्मादर्थः सत्तायाः सर्वप्रपंचानुगतेन ब्रह्मरू
पत्वं नासंभावितमित्याह सर्वेति सद्बुद्धेः सर्वप्रपंचानुगतत्वं तद्विषयत्वं। ननु नावेदविन्मनुते तं बृहंतं
तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुत्या शास्त्रयोनित्वादिति सूत्रेण न्यायाच्च प्रमाणांतरागोचरस्य ब्रह्मणस्तस्य
कथं घटः सन्नित्यादिचाक्षुषप्रतीतिविषयत्वं संभवति यद्यपि वाक्यार्थीभूतमखंडं ब्रह्म प्रमाणांतरायो
ग्यमेव तथापि तद्विषयोपहितं सर्वप्रमाणगोचरं इत्यसम्मतमिति सदृष्टांतमाह यद्यपीत्यादिना। घ
टाद्यत्यंतविलक्षणस्य सत्त्वस्य कथं घटसामानाधिकरण्येन ज्ञानमिति नाशंकनीयमित्याह तत्त्वप्रपंच
तादात्म्यापन्नमिति तत्सत्ता प्रपंचसत्ता। अपराप्याघटत्वादिजातिः स्वरूपेण व्यक्तिविशेषानालिंगित
रूपेण अदृश्यमानापीत्यर्थः प्रथमग्रंथोक्तं सद्बुद्धेरपरिदृश्यमानेत्यादिना ब्रह्मसद्रूपत्वं तेन श्रुतियु
क्तिभ्यामुपपादितं पुनः प्रपंचविषयसद्बुद्ध्यापीत्याह घटस्य व्यक्तिविशेषे दृश्यते इत्यंतेन प्रदृष्टके न विश्व
स्य सत्त्वं तद्रूपमित्येतत्प्रपंचयन्नैतदेव सद्बुद्धेरुपलक्षणं तत्सर्वमुपसंहरति। एवं चेति उ अनुगत
हीतादुपोद्बलितास्तत्श्रुतिः सदेवेत्याद्याः अद्वयश्रुतिः यतो वेत्याद्येकत्वप्रतिपादिका ताभ्यां सिद्धास
द्यक्तिरेकैव सजातीयादिभेदरहितैव। एवं प्रकारेणानेकत्वासंभवं सूचयन् निष्फलितमाह इति सद
द्वयमिति अद्वयश्रुतेर्द्वैतप्रत्यक्षबाधं परिहरति प्रपंचस्त्विति। प्रपंचोऽनिर्वचनीयः सद्भिन्नत्वात्

शुक्तिरजतवत् सदन्यत्वादिति सदन्यत्वेन प्रतीयमानत्वादित्यर्थः तेन हेतुसाध्ययोर्नाविशेषः न चा
सति व्यभिचारः।। तुच्छस्य निर्धर्मकत्वात् ननु प्रपंचनिर्वचनीयत्वं बाधितं अनिर्वचनीयादिशब्देरबोध्य
मानत्वादिति चेन्न न तावदस्मदीयैः शब्दैर्वाच्यत्वमनिर्वचनीयशब्देनोच्यते येनायमुपालंभः स्यात् किंतु केना
पि वादिना सत्त्वेनासत्त्वेन च प्रमाणतो निरूपयितुमशक्यत्वात् सदसद्विलक्षणत्वं तदपि बाधितं सत्त्वासत्त्वपक्ष
दूषणपरिहारियं न तु वास्तवः सदसद्विलक्षणत्वं धर्मोऽस्तीत्यभिप्रायेण लब्धे। ननु अनिर्वचनीयस्यापि प्रपंच
स्य प्रत्यक्षादिप्रमाणगोचरत्वात् कथमद्वैतश्रुतिबाधपरिहारः उच्यते अनिर्वचनीयस्य प्रपंचस्य शुक्तिरजत
वज्ज्ञानबाध्यत्वेन तद्विषयकज्ञानजनकप्रत्यक्षादेः अबाधितार्थकत्वरूपप्रमाणत्वासंभवात्। चक्षुरादिज
न्यज्ञाने प्रमात्वव्यवहारस्तु तद्विषयस्य सत्तिप्रमातरि अबाध्यमानत्वेनाविद्यातिरिक्तदोषजन्यत्वेन चशुक्तिर
जतादिवैलक्षण्यादुपपद्यते न च सति ब्रह्मणि अध्यस्तत्वेन सद्विलक्षणत्वेन प्रपंचेन सतोऽद्वैतापत्तिः संभाव्य
ते। रज्जाविव सर्पादिरिति निरुक्तं निगमयोपसंहरति। इतिनेतिकार्यप्रपंचस्यानिर्वचनीयत्वानुमानानुग्राहिकां श्रु
तिमाह तथा चेत्यादिना इत्यादिकेति सर्वस्य मृन्मयविज्ञातं स्यात् वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि
ति श्रुतिः विकाराणां मिथ्यात्वप्रतिपादनपूर्वकं कारणसत्यत्वप्रतिपाद्यस्वंसोमत्यादिना जगत्कारणेऽपि कार्य
मिथ्यात्वप्रतिपादनपूर्वकं कारणमात्रसत्यत्वं अतिदेशेन प्रतिपादयतीत्यर्थः।। तथाहि श्रुत्यर्थः एकस्य विज्ञा

नादन्यत्सर्वं कथं विज्ञातं भवतीति चेत् केतुना पृष्टः पितोत्तरं दातुं तं संबोधयति सोम्येति उत्तरमेवाह य
थेति लोके यथा एकेन मृत्पिंडेन करककुंभादिकारणभूतेन विज्ञाते न सर्वं मन्मयं मृत्पिंडस्य विकारजातं घ
टकरकादि विज्ञातं स्यात् । ननु कथं मृत्पिंडरूपे कारणे विज्ञाते तद्भिन्नकार्यं विज्ञातं भवेत् उच्यते । भवेदयं दो
षो यदि उपादानादुपादेयं भिन्नं भवेत् तदेव नास्ति कथं तर्हि इदं कारणं अयमस्य विकार इति भेदालंबनो व्यव
हारः तत्राह वाचारंभणं वागालंबनं वाग्विषय इति यावत् । कोसौ विकारः घटशरावादिकार्यं तत्तु किं त
त् नामधेयं स्वार्थे धेयः नाममात्रमित्यर्थः । वागालंबनं नाममेव केवलं न विकारो नाम वस्त्वस्ति परमार्थतः किं
त्वस्ति परमार्थत इत्यपेक्षायामाह मृत्तिकेत्येव सत्यं सत्यमस्तीत्यर्थः एवं दृष्टांतांतराण्युदाहृत्य अंते उपसंहर
ति एवं सोम्य स आदेशो भवतीति आदिश्यत इत्यादेशः केवलशास्त्रोपदेशगम्य आत्मेत्यर्थः । अयमभि
प्रायः यथा मृत्पिंडातिरिक्तवास्तवघटाद्यभावात् तद्विज्ञानात् सर्वकार्यं विदितं भवति तथा जगदुपादान २२
स्य परमात्मनो विज्ञानात् सर्वोपि प्रपंचो विज्ञातो भवतीति । अस्यानुग्राहकाण्यनुमानांतराण्याह एवमित्या
रभ्य ध्वस्त एवेत्यंतेन । यथा श्रुत्या प्रपंचस्य मिथ्यात्वं तथा अनुमानांतरैरपीत्येवंशब्दार्थः उत्पत्तिविनाश
वत्त्वादिति हेतौ पंचमी । तथा च प्रपंचोऽनिर्वचनीयः उत्पत्तिमत्त्वात् विनाशवत्त्वाच्चेत्यनुमानद्वयं सूचितं भ
वति । विपक्षबाधकतर्कं सूचयन्नुत्पत्तिविनाशौ विशिनष्टि सदसतोरिति । सत आत्मनोऽसतो नरशृंगा

६ ज्ञानस्य च दृश्यत्वाभावात् न समवायः तस्य निराकरिष्यमाणत्वात् तत्संबंधेपि युतसिद्धयोर्ज्ञानज्ञेययोस्तदसंभवात् संयोगसमवाय योरभावादेव तद्घटित संबंधांतरस्याप्ययोगात् ॥ ६

दृश्य उत्पत्तिविनाशप्रादुर्शनादित्यर्थः । तथा च प्रपंचो यदि अनिर्वचनीयो न स्यात् उत्पत्तिविनाशवान्न
स्यादिति तर्कतात्पर्यं प्रपंचो ध्वस्तः दृश्यत्वात् । शुक्तिरजतवदित्यनुमानांतरमभिप्रेत्य तत्र विपक्षबाधकत
र्कं सूचयन्नाह एवं दृश्यस्येति दृश्यत्वे कार्यत्वादिनाऽध्यवसेये दृशि चेत्तस्य अध्यासः कल्पनं चैतन्यनिष्ठाज्ञा
नोपादानकत्वं तद्व्यतिरेकेण दृश्यमानत्वासंभवादपि अध्यस्त इति योजना । प्रपंचो यदि अध्यस्तो न स्यात् दृश्यो
न स्यादिति तर्कतात्पर्यं अध्यस्तत्वं विना दृश्यमानत्वस्य कथमसंभव इत्याशंक्य दृश्यमानत्वं तावद्दर्शनसंबंधित्वं
स च दृश्यदर्शनसंबंधो न संयोगः द्रव्ययोरेव संयोगनियमात् । विषयविषयिभावलक्षणस्वरूपसंबंधस्य
चासंभवात् । तथा हि न तावत् ज्ञानविषययोः स्वरूपद्वयं संबंधः अतीतानागतयोर्ज्ञानविषयत्वाभावप्रसं
गात् । नत्र ज्ञानविषयस्वरूपद्वयासंभवात् न च ज्ञानस्वरूपमेव संबंधः । ज्ञानस्वरूपस्य सर्वविषयान् प्रत
संबंधांतरमंतराविषयप्रतीतिनियामकत्वं योग्यत्वं विशिष्टत्वेन घटज्ञानस्य घटेनेव पटादिनापि संबंधत्वप्रसंगात् । संबंधिभेदघटितसंबंधलक्षणासंभवा
दपि न संबंधिस्वरूपं संबंधः ज्ञानज्ञेययोर्योग्यतारूपधर्मविशेषस्यापि संबंधत्वं तस्य षट्पदार्थेषु अंत
र्भावयितुमशक्यत्वाद्युक्तं नु चाखंडोपाधिरूपं सामान्यमस्त्विति वाच्यं जातिमात्रविलोपापत्तेः न च सर्व
वस्त्वखंडोपाधेः स्वाश्रयसमवायो न संभवति । जातेस्तु द्रव्यादित्रयमात्रवृत्तेः संभवतीति तयोर्भेद इति वाच्यं ।

न तावत् द्रव्यादित्रिकांतर्भावः सामान्यादेर्विद्यमानत्वात् । नापि सामान्यादित्रिकांतर्भावः तेषु वृत्तेः २

यथा गोत्वादिजातेः कालरूपाश्रयेण न समवायः किंतु साक्षात्त्वादिमत्त्वेनाश्रये तथाऽखंडोपाधेरपि तथात्वं कल्प्यतां
किं जातिरूपसामान्यकल्पनया। न चाऽतिवादिनां जातिमान्यैः सिद्धांतसंयोगो युक्तः त्वागोत्वयोग्यतारूपसंबंधस्या
पि स्वसंबंधिनि संबंधांतरास्युपगमापातेनानवस्थाया दुःपरिहरत्वात्। एवमसंगत्त्वव्यक्ते दृश्यदर्शनसंबंधे
तन्निर्वाहार्थं दर्शने दृश्यस्याध्यस्तत्वं वक्तव्यं इत्याशयेनाह। तत्संबंधासंगत्वेनेति तयोर्ज्ञानप्रपंचयोः सं
बंधस्त संबंधः ननु ज्ञाने ज्ञेयस्याध्यासेपि कथं तयोः संबंध इति चेत् उच्यते अधिष्ठानाध्यस्यमानयोस्तादा
त्म्यं संबंध इति रूढः। तच्चोपपादितं सद्रूपं ब्रह्माद्वयमिति मते दोषं वक्तुं विकल्पयति ननु ब्रह्मेति ब्रह्मस्वरूपं
सत् इति धर्मिनिर्देशः। तद्वैतेनेति तत्तस्य सतः अद्वैतेनेति भावप्रधानो निर्देशः धर्मधर्मिरूपद्वयाभ्युपग
मात् अद्वैतत्वं त्वतिरिक्तमर्थः। दूषणांतरमाह धर्मरूपेति अंतरवेद्यपूर्वोक्तदूषणमाह वसत्ता वैशिष्ट्याभा
व पक्षोप्ययुक्त इत्यर्थः। पूर्वोक्तदूषणं तु स्वरूपसत्तापक्षोक्तं घटाकारप्रतीत्यनुपपत्तिरूपं। ब्रह्मणः स
त्ता वैशिष्ट्याभावे घटयोगतिः सद्रूपत्वं वा सद्भिन्नत्वं वा आद्यं अत एवेत्यनेन निराकृतं सद्भिन्नेति यं निराकृ
रोति ब्रह्मणोसत्वेति। सद्भिन्नस्य रजतादेर्वैतरेस्सत्वादित्यर्थः अथवा अत एवेति पूर्वोक्तोऽसदद्वै
तमहानिपरामृशति ब्रह्मणः सद्वैशिष्ट्याभावे नरविषाणवत् तुच्छत्वापत्त्यासतद्धार्यस्यैव यान्वापि दि
ह २३

त्यावः अतएव ब्रह्मणोऽसत्त्वापत्तिरुक्ता। चकारेण ब्रह्मणः सद्रूपत्वांगीकारे घटाकारप्रतीत्यभावरू
पं दूषणं समुच्चिनोति। द्वितीयविकल्पस्याद्यमपक्षं कल्पते तत्र प्रसंजितं दोषमुद्धरति नेत्यादिना।
स्वतएवेति। स्वस्वरूपसत्तयैवेत्यर्थः। न चैतद्दृष्टचरं तथैव स्वीकृतत्वादित्याह यथेति सत्त्वस्य सत्ताजा
तेरित्यर्थः। स्वतएव स्वस्वरूपसत्तयैव तत्र वमत इतिशेषः एवकारव्यावर्त्यमाह। नहीति स्वस्वरूपाति
रिक्तसत्ववैशिष्ट्यमत्रानवतीत्यर्थः। ननु सतः सत्त्वं सत्त्वांतरविशिष्ठेन स्वरूपसत्तया। वा इत्ति ब्रह्मणि ग
नकर्चितायां घटादेरसत्त्ववैशिष्ट्ये नैवतत्कृते। सत्वेपि तथैवस्यात्। प्रतिबंदीमात्रेणस्वपक्षदूषणस्यपरि
हारात्। इत्याशंक्यविपक्षेदंडमाह। सत्वस्येति। सतिसत्त्वस्यास्यानाविकल्पे परोपाधिकत्वे आदिपदेन
घटाद्युपाधिकाकाशपरिच्छिन्नत्वं दृष्टव्यं। मवेति भावप्रधानोनिर्देशः। सतिब्रह्मणिस्वरूपसत्तयास
द्व्यवहारमुपपाद्य घटाकारप्रतीत्यनुपपत्तिदोषपरिहारमाह। ब्रह्मेति। ब्रह्मसदितिबुद्धिवत्सद्वै
शिष्ट्यविषयेवेतियोजना। सद्वैशिष्ट्यं सत्तादात्म्यं। तत्र हेतुमाह विशिष्टेति तत्र दृष्टान्तं हेतुमाह घटवि
घाद्दृशायामिति ब्रह्मत्वविशिष्टस्य वस्तुब्रह्मणाद्वा संपदर्थांतरं तच्च सत्त्वरूपोपलक्षिते अखंडचैतन्यैक
त्वमिलं इतिघटः सन्निति प्रत्ययवच्च ब्रह्मसदिति प्रतीतिरविरुद्धेत्यर्थः अस्मन्मते हि घटः सन्निति प्रत्ययो
ऽधिष्ठानसत्तायो कल्पितघटतादात्म्यं च विषयी। करोतीत्युक्तं। इति न दृष्टान्तासिद्धिः ननु उक्तं सत्त्वासत्तेनवा।

अद्वैता·टी·
२८

नचेन्नरशृंगतुल्यता नास्तीति चेत् तज्ज्ञानं सत् उतासत् आद्ये सद्द्वैतहानिः अंत्ये नास्यास्यापि सत्त्वं न
स्यात् न ह्यसत्तानानेन नास्य सत्त्वं विलुमर्हति। प्रयोजकसत्त्वप्रयुक्तत्वात् प्रयोज्यसत्त्वस्य। किंच सतः स्व
तोपुरुषार्थत्वेन तदतिरिक्तः श्रवणादिसाध्यो नित्यपुरुषार्थरूपो मोक्षरूपानंदः सद्रूपोऽभ्युपेयस्तथा चाद्वै
तहानिः इत्याशंकां परिहरन् सप्रमाणं विज्ञानानंदस्येतत्त्वं पंचयन्ति तच्चेति सद्विषयकज्ञानांतरान
भ्युपगमात् सदतिरिक्तपरमपुरुषार्थानंदांतरानभ्युपगमाच्च नोक्तदोष इत्यर्थः ननु ज्ञानविषययोर्घ
टादौ नेदं दर्शनादर्शनेऽस्य च कुत्राप्यदृष्टेः कुतो ब्रह्मविषयज्ञानांतराभावः तत्राह चैतन्येति। तस्मिंश्चैतन्ये
ध्यासस्तमंतरेण प्रकाशायोगादिति संबंधः। प्रकाशो इति व्यवहारायोगादित्यर्थः। ननु चैतन्यानध्य
स्तस्यापि प्रकाशमानत्वे कोऽनुपपत्तिस्तत्राह संबंधासंभवेनेति। प्रकाशो हि स्वसंबद्धं प्रकाशत इति
व्यवहारं जनयेत्। प्रदीपादिवत्। अन्यथाऽतिप्रसंगात्। स च चैतन्यसंबंधो विषयस्य संयोगादिर्न सं २८
भवतीत्युपपादितं ततश्चासतः तश्चैतन्यादिन्नस्य प्रकाशमानत्वमभ्युपगच्छता चैतन्ये कल्पितत्वमेव
ःप्रध्यस्तत्वेचेति ॥ वक्तव्यमित्यर्थः। ततः किं तत्राह। अध्यस्तत्वे चेति यद्यानन्यनित्यस्य ज्ञानस्य नित्यप्रसंगोऽन्वेदः कृयमित्या
शंक्याह। ननु ज्ञानस्यापि इंद्रियसंप्रयोगादिकारणान्वयव्यतिरेकानुविधायित्वेन कार्यत्वात् घटादिव
दध्यस्तत्वं। कार्यकारणभावग्राहकप्रमाणं जन्यज्ञानविषयत्वेनास्वप्रकाशत्वोच्चतया हंतत्याचक्र

अध्यस्तत्वेचेति २

यमनध्यस्तत्वमतो नेदं इत्याशंक्याह चैतन्यं चेतितितत्स्य कार्यत्वात्स्वप्रकाशत्वसाधकहेत्वोरसिद्धिरिति भावः।
सतश्चैतन्यान्नेदं विपक्षबाधकबलेन साधयिताततस्यैव दाद्कार्यचैतन्यस्यापि तदभेदं सहेतुकं प्रतिज्ञा
नीते चैतन्यमपीति बाधायोग्यत्वमात्रेण कथं सत्त्वं नहि घटत्वेन पटत्वं भवति न च व्याप्यव्यापकभावाद
विरोधः। शुक्तिचैतन्येऽसत्त्वबाध्यायोग्यत्वस्वरूपद्वयानिरूपणात् तत्राह। सत्त्वस्येति तत्स्वरूपद्वयात् तद
भिन्नत्वादित्यर्थः। योग्यत्वसत्त्वयोरभेदे हेतुहेतुमद्भावः कथं इति न वाच्यं सद्व्यष्टिवाच्यत्वस्यैव साध्यमा
नत्वात्। कथं बाधायोग्यत्वमित्याशंक्य किं बाधो नाम विनाशः उतात्यंताभावः आद्येऽपि किं ज्ञानेन बाध्य
त्वं उत बाधितत्वमेनेति विकल्पाद्यासंभवं प्रतिजानीते न तावदिति कथमसंभव इति चेत्। तत्र वक्तव्यं किं
स्वस्वरूपज्ञाननाशकत्वं चैतन्यस्य उत ज्ञानांतरनाश्यत्वं। वृत्तिनाश्यत्वं वा। आद्येऽपि किं कारणांतरमपेक्ष्या
ज्ञानेन नाशयति उतानपेक्ष्य अंत्ये आह स्वाधीनेति हेतुगर्भविशेषणं द्वितीयकल्पे तत्स्वप्रयुक्तनाश
संभवेपि स्थायिनस्तन्नाशं भवति स्थायित्वहानिप्रसंगात् नाद्योऽपि कारणांतरानिरूपणात्। द्वितीयं
यं निराचष्टे ज्ञानांतरेति चशब्दः सूचितमसत्त्वहेतुमाह। ज्ञानस्येति। अद्वयत्वात् अद्वयत्वस्य साध्यमा
नत्वादित्यर्थः तृतीयमुत्थाप्य दूषयति न च वृत्तीति न चेत्यत्र हेतुमाह हेतुमाह वृत्तीति तन्नाधीतितद्यो

अध्य॰ टी
त्मत्वव्यक्तिनाशप्रत्यायोगात्। नहि घटसन्नाशे तत्प्रकाशकस्य दीपस्य घटनाशात्त्वं दृष्टं उपपन्नं वा।
नाशकांतरमपि न संभावनीयमित्याह न चानादीति। ज्ञानस्य नाशकांतराभावे हेतुरद्वयेति। सामान
२५ सत्ताकद्वयरहितस्येत्यर्थः। विषमसत्ताकेनापि द्वितीयेन ज्ञान^[नस्य]^नाशोऽस्त्विति न वाच्यं ज्ञानादन्यज्ज्ञाने
कल्पितस्य ज्ञाननाशकत्वासंभवात्। नहि शुक्तिकादौ कल्पितं तन्नाशकं दृष्टं ज्ञानस्य कार्यत्वात्कार
णेन सद्वितीयमिति नाशं कनायं इत्याह। अनादीति चैतन्यस्य नाशे कारणसंभवमुक्त्वा प्रकारां
तरेणापि तदसंभवमाह निरधिकरणेति। साधिकरणो हि शुक्तिरजतादेर्नाशो दृष्टः स च ब्रह्मरूपस्य
चैतन्यस्य निरधिकरणस्य न संभवतीत्यर्थः॥ नन्वस्तु चैतन्यं निरधिकरणं तन्नाशस्य किंचिदधि
कारणमस्त्वित्याशंक्याह। अधिकरणेति तदधिकरणं जडं स्वप्रकाशं वा आद्ये प्रकाशकांतराभा २५
वात्तस्यासत्त्वापत्तिः अन्त्ये। आह तदेवेति न च तस्य नित्यत्वे विप्रतिपत्तिः विनाशाधिकरणयोः
कल्पनापरंपराप्रसंगात् बाधो वा विनाशो वा इति विकल्पस्य द्वितीयं दूषयति। ना
५ पि स्यादिना अबाधितस्य स्वरूपप्रकाशसिद्धस्यात्मचैतन्यस्यात्यंताभावः संभवत्येव न अंगीकृ
त्यापि दूषणमाह तत्साधकेति असाक्षिकबाधस्यासत्त्वापत्तेस्तत्प्रकाशकं चैतन्यं स्वीकर्तव्यं
५

तस्य ^[चा]^बाध्यत्वमेव वक्तव्यं अन्यथा बाधतत्साक्षिकल्पनापरंपराप्रसंगादिति भावः। चैतन्यस्योक्तं
बाधायोग्यत्वरूपं सत्त्वमुपसंहरति तस्मादिति एवकारेण चैतन्यव्यतिरिक्तस्य जडस्य चैतन्येऽध्यस्तत्वे
न सत्त्वं वारयति। उक्तं चैतन्यस्य रूपत्वं सत्त्वमुपपाद्यानंदरूपत्वमप्युक्तमुपपादयितुं श्रुतिर्जानीते
एवमिति तत्सद्रूपत्वं चैतन्यं एवकारेणासूचितमानंदात्मकत्वाभावाभावं विपक्षबाधकेनोपपादय
ति अन्यथेति। विवेकवैराग्यादिमतस्तावन्मोक्षसाधनं ज्ञानमिति निश्चिन्वतो ब्रह्मज्ञाने प्रवृत्तिर्दृश्य
ते। ब्रह्मज्ञानफलं च ब्रह्मवेद ब्रह्मैव भवति ब्रह्मविदाप्नोति परमित्यादिश्रुत्या ब्रह्मैवेत्यवधृतं ब्र
ह्मातिरिक्तस्यानित्यत्वेनापुरुषार्थत्वादपि ब्रह्मैव मुक्तिरित्यवधृ^[त]^तं तच्च ब्रह्म सच्चैतन्यात्मकं इत्यनु
पदमेवोपपादितं तथा च चैतन्यात्मकमोक्षस्य पुरुषार्थत्वायानंदरूपतापि वक्तव्येति भावः। ननु
संसारवहनादिजन्यदुःखाक्रांतस्य तन्नाशाद्युपगमे न दुःखं दूरे सति अहो मे सुखमिति व्यपदेशात् दुःखा
भाव एव सु^[ख]^खमिति कथं तस्य सद्रूपब्रह्मानंदत्वमिति चेत्। उच्यते आनंदस्य प्रतियोगिनिरपेक्षप्रती
तिकत्वेन दुःखाभावदशायामपि अकस्मादुपनतेषु वेणुवीणाध्वनिषु सरससुखोत्पत्तिदर्शनेन
च सुखस्य दुःखध्वंसभिन्नत्वात्। पुण्यकर्मोपार्जितचंदनादिज्ञानजन्यसुखपर्यायप्यांतःकरणवृत्ते ते

अद्वै. टी. रि व्नाशाद्यपगमस्य तज्जन्यदुःखाज्ञानावस्थयाऽज्ञानस्मरणाभिव्यंजकत्वेन तस्मिन् सुखव्यवहारोपप
न्नेरितिदिक्। प्रथमश्लोकार्द्धोक्तमर्थमुपपादितमुपसंहरति एवमिति प्रपंचस्यानिर्वचनीयत्वं श्रु
२८ तियुक्तिभ्यामुपपादितं। महासत्तायाः अनुगतत्वं घटः सन् पटः सन्नित्याद्यनुगतबुध्याऽवगतं सद्दाद्या
त्मकत्वं च ब्रह्मणः श्रुतिशुयुक्तिभ्यां दर्शितं। ननु महासत्ताया जगदधिष्ठानब्रह्मणोऽनतिरिक्तत्वेऽपि त्वे॰
पिगोत्वाद्यपरजातेरतिरिक्तत्वेन सत्त्वानपदसूचितसदद्वयत्वहानिस्तदवस्थैवेत्याशंक्यैकानिरा
करणार्थं नानाजातिमयमित्युक्तं तत्प्रपंचयति। एवंगोत्वादीत्यादिना यथा परजातिमता परा सत्ता
कारणातिरिक्ता न भवति तथैवेत्येवंशब्दार्थः मायायाः प्रपंचानुगतत्वं प्रपंचगतजात्यादेवसेयं। माया
या एकत्वं चाजामेकामिति श्रुतावेकवचनैकपदप्रयोगाभ्यामवगन्तव्यं। आत्मनि अध्यस्तत्वं चा २८
द्वितीयब्रह्मप्रवेशान्तार्थान्यथानुपपत्त्याऽवगंतव्यं। मायया अध्यस्तत्वप्रतिपादनेन ब्रह्मणो द्वै
तापत्तिः परिहृता भवति। प्रपंचानुगतत्वेनेन पदेन तस्याः परानभिमतजातिजन्यव्यवहारजनक
त्वसामर्थ्यं द्योतितं। एकेति पदेन गोत्वाद्यनेकजातिकल्पनापेक्षया लाघवं सूचितं विशिष्टेन परमते
६ जातिरूपधर्मिकल्पनागौरवं व्यंजितं। सर्वाचार्यसंमतमतमाह अहो वचेति प्रथमपद्ये माद्यपतिन ६

६२
न्विति कथं शब्दसूचितात्वेपे हेतुगर्भविशेषणं अनाद्यनंतेति। तथापि मायातो नैर्दैकोहेतुः कः विरुद्धधर्म
वत्वमित्यभिप्रेत्याह। मायया इति तावतापि कथं विरुद्धधर्मवत्वमित्याशंक्यानाद्यनंतपदोक्तं मायया
वं जातैर्विरुद्धधर्मत्वं स्फुटयति। जातेश्चेति। किं मायायाः अनादित्वाज्जातीनां जातिवैलक्षण्यं व्यवस्थितता
नंतत्वान्नावादितिविकल्पाद्यमस्थाद्दूषयति नतावदिति अनादीति हेतुगर्भविशेषणं। जगत्प्रवाह
वियदादिप्रपंचपरंपरा। मायया अनंतत्वं जातिवैलक्षण्यप्रयोजकं न भवतीत्याह। अनंतत्वमितितत्र
हेतुमाह सर्वस्याचिति। अपि नानाजातेरनित्यत्वे केभुतिकन्यायं दर्शयति जातिरनित्या। जडत्वादित्यनुमा
नेविपक्षबाधकं तर्कमाह। अन्यथेति न च प्रधान परमा। एवाद्यैव्यभिचारः तदनभ्युपगमात् आकाशा
देश्च जन्यत्वेनानित्यत्वात्। ननु प्रपंचस्याविनाशिनो ज्ञाननिवर्त्यस्य सत्यत्वे न सत्तद्वितीयं नास्तीति
वदंती श्रुतिविरुद्धेत विनाशित्वे प्रपंचस्य सतोऽसतो वा विनाशः संभवे न मिथ्यात्वान्नसदद्वैतश्रुति
विरोधं धइत्युक्तं। अनुमानेन प्रपंचस्य विनाशित्वं साधयितुं श्रुत्यापि साधयति। नामरूपेति।
अत्रापि मायाजातेर्ज्ञाननिवर्त्यत्वे कैमुतिकन्यायप्रदर्शनं। चकारेण जनिमतो भावस्य वियदादि
प्रपंचस्य विनाशित्वानुमानं च सूचयति जातेरनित्यत्वे प्रमाणं मुक्तावनित्यत्वे प्रमाणाभावमाह।।
सर्वमुक्ताविति ननु प्रलयकाले परित्यज्य सर्वं। मुक्तिपर्यंतं धावनोद्युक्तये जातिसद्भावस्वयांगीकृतः त
अविनाशित्वे कथमद्वैतश्रुतिविरोधः विनाशित्वे वा कथं तदविरोध इति चेत् शृणु अ

अद्वै॰ टी॰ दसर्वमुक्तिकालेपितत्सद्भावः किं न स्यादित्याशंक्य प्रलयोत्तरकालीनसृष्टौ गोत्वादिजातिव्यवहारानुरो
धेन तत्सत्त्वस्वीकर्त्तव्यः। न च तथा सर्वमुक्तावस्तीत्याह नहीति। पुरुषादृष्टनिबंधनो हि सर्वव्यवहारः स च स
२७ र्वेषां पुरुषाणां मुक्तौ न संभवतीति भावः। न च सर्वमुक्तौ प्रमाणाभावः एकाविद्यापक्षे एकमुक्तेरेव स
र्वमुक्तित्वात् नानाविद्यापक्षे ज्ञाननिवर्त्यानां तासां निरवधौ काले निरन्तरसंभावितत्वात्तदभावात् न के
वलं सर्वमुक्तौ जातिसद्भावे प्रमाणाभावः बाधकमप्यस्तीत्याह तदाश्रयेति। तस्याः जातेराश्रयभूताया
व्यक्तेस्तां विनेत्यर्थः परमते प्रलयेपि आश्रयाभावाज्जातिर्न संभवतीति चकारेण सूचयति। अनुपप
त्तिमेव स्फुटयति। नहीति उपपन्ना वेति धर्मस्याश्रयपरतंत्रत्वात्तेन विना तदवस्थितिर्नोपपद्यत इ
त्यर्थः। नन्वनित्यधर्माणामाश्रयं विनास्थित्यभावेपि नित्यधर्माणामाश्रयं विनापि स्थितिरस्त्विति चेत्
न उक्तरीत्या जडत्वादिना जातेरूपादिवदनित्यत्वात्। अन्यथा रूपादीनामपि नित्यत्वमभ्युपगम्य प्रल २७
यादौ सद्भावः किमिति न स्वीक्रियते किं च प्रलयादौ जातेः सद्भावे सिद्धे तस्या नित्यत्वसिद्धिः नित्यत्वासि
द्धौ च व्यक्तिव्यतिरेकेण सद्भावकल्पनमित्यन्योन्याश्रयः स्यात् सर्वमुक्तिकाले आश्रयाभावोस्त्वित्या
शंकते। काल इति। एवं सत्यतिप्रसंग इत्याह तर्हीति कालोपि घटपरावृत्तिः स्यादित्यर्थः तत्र हेतुः।
घटत्वेति। कालो घटाभिन्नः घटत्वाश्रयत्वादित्यनुमाने घटत्वसमवायित्वमनुपाधिरित्याशंक्य तस्य ७

साधनव्यापकत्वान्नोपाधित्वमित्याह तत्समवायस्येति कालेसर्ववस्त्वधिकरणत्वस्य तैरभ्युपगमादि
ति भावः। न च कालवृत्तिसमवाये घटत्वनिरूपितत्वं नास्तीति वाच्यं। घटनिष्ठघटत्वनिरूपितसमवाय
स्यापि सर्वाधारे कालेऽबाधितत्वात् ननु कालेविद्यमानेपि घटत्वसमवायः सहकार्यंतराभावान्न तत्र
घटव्यवहारं जनयतीति चेत् सहकार्यंतरानिरूपणादित्याह तन्निरूपितेति एवकारेणादृष्टरूपसहका
र्यभावान्न काले घटव्यवहार इति वक्तुं न शक्यते इति सूचयति सकलजदृष्टकारणसंपादकत्वाददृष्टस्य त
सद्भावेऽदृष्टाभावस्य वक्तुमशक्यत्वात् सर्वमुक्तौ कालसद्भावमभ्युपेत्य दूषणमुक्त्वा अधुना सोपि नास्ती
त्याह। कालस्येति। निराश्रयजातिसद्भावाग्रहिणं प्रत्याह सहजात्यादिति रीति। आदिशब्देन अविद्या
वृत्तौ तत्संबंधरूपकालस्य निवृत्तिरूपो दोष इत्यर्थः ईश्वरे कालसंपुष्टस्य यौगिकत्वपक्षं शंकते नि
खिलेत्यादिना। कलयति सर्वं स्ववशे करोतीति तत्र हेतुः निखिलेति यो यत्स्रष्टा स तद्वशे करोतीति तादृशव
र्त्तिरिति लोके प्रसिद्धमित्यर्थः। श्रुतिसिद्धजगत्कारणीभूतचैतन्यरूपस्य ब्रह्मणः कालरूपत्वेपि
अविद्यातत्कार्यातिरिक्तस्वतंत्रपरमार्थिकजात्याश्रयत्वायोग इति परिहरति तस्मिन्निति तत्स्य
सर्वथा तद्भिन्नत्वजातेः सर्वमुक्तौ साश्रयत्वं न संभवतीति प्रसंगं निगमयति। पातालाध्यस्तामायेबगोधा
ध तत्कार्यग्रहः अविद्यासंबंधः काल इति पक्षमनूद्य दूषयति कालो मायेति सर्वमुक्तौ अविद्यानि द

अद्वै॰ टी॰ दिजातिरिति फलितमाह। अविद्येवेति। जातेर्जडत्वहेतुकानित्यत्वानुमाने सत्प्रतिपक्षतामाशंक्यते
२८ नन्विति। जातिर्नित्या अनादिभावत्वादात्मवदिति घटादौ प्रागभावे च व्यभिचारवारणा
य हेतौ पदद्वयं। पूर्वोक्तानुमानस्य सत्प्रतिपक्षग्रस्तत्वे फलितमाह इति कथ[illegible]मिति मायया अज्ञान
निवर्त्यत्वेनानित्यत्वाज्जातेरनित्यत्वसाधकानुमानस्य अनुमानप्रतिबद्धत्वेन जातेर्नित्यत्वात्।
नित्यानित्ययोरत्यन्तायोग इति भावः सर्वमुक्तौ आश्रयमंतरेण जातिसद्भावो न संभवतीत्ययु
क्तं तदपि सुपरिहरमित्याह अत एवेति जातेर्नित्यत्वादेवेत्यर्थः व्यक्तिमंतरेण धर्मोक्तिनियमस्तु
अनित्यधर्मविषय एव अन्यथा प्रामाणिकनित्यत्वत्यागप्रसंग इति भावः अत्यनुमानस्य दुर्बलत्वात्
पूर्वानुमानबाधकत्वं इत्यत्ति प्रेत्य तस्य दुर्बलत्वमुपपादयति नेति न च मायायां भावत्वाभावान्न २८
व्यभिचार इति वाच्यं नञर्थानुल्लिखितधीविषयत्वरूपभावरूपत्वस्य मायायामनिवारणत्वसद्रूप
८ भावत्वस्य द्वद्रूपजालावच्छिन्नभावे नानादिभावत्वस्य हेतोर्व्यभिचाराभावेपि स्वरूपासिद्धत्वान्निवृत्तानाविद्या
द्यारंभोत्थ वाच्यायां मायायाः कथं नञर्थानुल्लिखितधीविषयत्वं भावत्वं सत्त्वं तथापि अज्ञानाविद्या
दिपदानां भावरूपमुख्यमंजस्य उल्लिखितधीजनकत्वाभावात्। अज्ञानादिपदानां ज्ञानविरोधित्व
त धि ८

स्येव प्रतीयमानत्वात् निर्दुष्टप्रमाणांतराविरुद्धत्वादपि त्वदीयमनुमानं दुर्बलमित्याह। आगमविरुद्धेति। क॰
आगमो द्वैतश्रुतिः अस्य जातेर्नित्यत्वसाधकस्य किंचानादिभावत्वस्य न दृष्टांतसद्भावमात्रेण नित्यत्वप्रयो कु॰ २
जकत्वं अन्यथा योनादिरभावः स न निवर्त्तते अत्यंताभाववत् इति दृष्टांतसद्भावात् प्रागभावोप्यनित्यो न
स्यात्। किंतर्हि भावनिवृत्तौ प्रयोजकमित्याशंकायां सदृष्टांतमुद्भावात् प्रागुत्तरमाह। अनादीति अभाववत्
भावस्यापि निवर्त्तकसंपत्तेरेव निवृत्त्युपपत्तेरनादिभावत्वं न नित्यत्वप्रयोजकमिति चकारेण आगम
विरोधं दृष्टप्रदृष्टपत्वेनानित्यत्वं सूचयति फलितमाह। अप्रयोजकत्वादिति अनादिभावत्वस्यानिवृत्तौ
अप्रयोजकत्वे आत्मनोपि कथं न निवृत्तिरित्याशंक्य सकलभावाभावसाक्षित्वेन निवर्त्तेरसंभावितत्वम
त्तिप्रेत्याह चिदात्मनास्त्विति न वेति निषेधार्थको निपातो देहलीदीपकन्यायेनोभयत्र संबध्यते तु श
ब्देन सर्वाधिकरणस्यात्मनोऽधिकरणाभावान्निरवधिकनिवृत्तेरसंभावितत्वं द्योतयति। निवर्त्तकासंभ
वादपि न तन्निवृत्तिरित्याह। न चास्ति निवर्त्तकमिति। जात्यादेर्जडस्य साधिष्ठानस्याजातिकस्य सावधिकना
शो निवर्त्तकस्य च संभव इत्यभिप्रेत्याह। इति निविशेष इति। जात्याद्यपेक्षयैव विशेषः मायाया जातित्वपक्षे
[illegible]परान्तिमतत्वे घटादिजातेरुत्पत्त्युत्पत्तिविनाशित्वान्मायाजात्योरभेदेन विकल्पात इत्युक्तं। इदानीं जा

अद्वै॰ टी तेन नित्यत्वेपि ब्रह्मचैतन्यस्य जातित्वप्रसक्तौ उभयोरभेदान्न विरोध इत्याह महासामान्येतो ति सर्वानुस्यूतं
२९ ब्रह्मचैतन्यमित्यर्थः तद्दानंत्यमिति ...स्याः गोत्वादिजातेरानंत्यं। — नित्यत्वमित्यर्थः। ननु ब्रह्मणो नाना
जातिमयत्वस्युत्पादनावसरे मायया जातिमयत्वस्युत्पादनमसंगतं सत्यं तथापि ब्रह्माध्यस्तायास्तस्या वा
नद्भ॰४ स्तवं ...दर्शनाभावात् जातेर्माया नित्यत्वस्युत्पादनेन ब्रह्मणोपि स्युत्पादितो भवतीति मन्यते अथवा परा नित्यम
ता जातिरपारमार्थिकी नास्तीति वक्तुं प्रसंगादेतदुक्तं मायया ब्रह्मणो वा गोत्वादिजातिरूपत्वेऽति प्रसंग
माशंक्य तेनन्विति एवं मायादेर्जातित्वेपटत्वसंबंधात्स्वविषये पटज्ञानं प्रमेत्युच्यते। तच्चेत्पटत्व
मविद्यादिरेव तद्घटेपि तस्यानुस्यूतत्वात्तत्रापि तज्ज्ञानं प्रमा स्यादिति हेतुमाह त्वदभिमतेति
पटत्वसंबंधातिरिक्तपटव्यवहारकारणमस्ति तदभावान्न घटे पटज्ञानं प्रमेत्याशंक्यां परिहरति
न चेति कथं तत्याशंक्य तव मते घटस्य पटव्यक्तित्वानिवारणादिति हेतुमभिप्रेत्याह। पटत्वेति। २९
तथा च मायादेः पटत्वादिजातित्वे घटेपि तत्संबंधसत्वात्सोपि पटव्यक्तिरेव स्यादिति भावः पट
त्वाद्यधिकरणव्यक्तिरेव पटादिव्यक्तिरित्यसिद्धं। पटत्वजात्याश्रयनिरूपणे अन्योन्याश्रयापाता
त्पटत्वाश्रयत्वेसिद्धे पटव्यक्तित्वं सिद्ध्येत् तत्सिद्धौ च पटत्वाश्रयत्वं इत्याह। नेति किं तर्हि तत्तद्व्यक्ति

२

पटव्यक्तित्वप्रयोजकमित्यत आह। पटत्वादीति तदाश्रये पटत्वाश्रये। स च स्वरूपविशेषः क्षीरा
दिमाधुर्यवद्विशेषतो निर्देष्टुमशक्य इत्याह कस्यचिदिति अतिप्रसंगवारणायाह घटादौ स्वरूपवि
शेषस्य तु परि पटव्यक्तौ च प्रयोजकस्येत्यध्याहार्यं। पटत्वातिरिक्तः पटव्यक्तौ विशेषस्त्वयापि स्वी
कर्तव्य इति विपक्षबाधकमनुरवेनाह। अन्यथेति। तत्तद्व्यक्तिवृत्तिजात्यतिरिक्तविशेषानंगीकारे तद्व
र्तित्वं पटव्यक्तिचर्मत्वव्यवस्थानियमः कथं न सिद्ध्येदित्याकांक्षायां सामान्यन्यायमाह न हीति यथा
वह्निजलयोः कस्य स्पर्श इव तद्धर्मद्वयपुरस्कारेणैव दाहकत्वक्लेदकत्वनियमः एवं वृत्तित्वस्य पटत्वादिजा
तीनामपि तत्तदसाधारणविशेषपुरस्कारेणैव वृत्तिनियमो वक्तव्य इति भावः। ननु यत्र पट इति प्रती
तिस्तत्र पटत्वजातिरिति नियमे संभवति किं व्यक्तौ अतिरिक्तविशेषकल्पनयात आह पटादीति
घटादावपि पटादिभ्रमसंभवात्तत्रापि पटत्वं वर्तेतेति भावः। ननु प्रतीतौ प्रमेति विशेषणान्नायं दो
ष इति चेत् पटज्ञाने प्रमात्वे सिद्धे तद्विषये पटे पटत्ववृत्तिसिद्धिः तत्सिद्धौ च पटज्ञानस्य प्रमात्वमि
त्यन्योन्याश्रयत्वमित्याह तत्प्रमात्वस्येति व्यवस्थितं निष्कृष्टं यत्पटत्वादि तेष्वित्यर्थः। तच्च तत्तादृत्पु
रस्सरार्थः ननु सर्वप्रपंचदेशव्यापिकाया मायाया ब्रह्मसत्ताया वा तत्तज्जातिरूपत्वे तत्तत्सर्वपदार्थ

अद्वै. टी.

संबंधे च सति सर्वपदार्थेषु सर्वव्यवहारो न भवतीति दुर्लभमिति चेन्न तवाप्येतद्दोषसाम्यादि
त्याह। नहीति। घटादिवृत्तिघटत्वादीनां घटादिसंबंधो न भवतीति वक्तुं न हि शक्यं इति संबंधः। संबं
धयोग्यतामाह तदंतरालेति। तेषां घटादीनां मध्ये स्थिता ये घटादयः इत्यर्थः। अंतरालस्थत्वमुप
पादयन् घटादीनूचिषि नष्टि नानादेशेति एकापटत्वजातिर्नानादेशस्थ घटव्यक्तीः व्याप्नुवंती त
न्मध्यवर्तिनो घटादीनपि आकाशादिवत् व्याप्नोतीति भावः। ननु घटत्वजातेः कल्पमायेन घटादिसं
बंधे सत्यपि घटव्यवहारप्रयोजकसमवायस्याभावात् न तत्र घटव्यवहार इत्याशंक्य निराकरो
ति न चेति। नेत्युक्तं विकल्पेति। समवाये तिघटवृत्तिरूपादिसमवायस्यैव समवायाद्भिन्नत्वादेप
टत्वसमवायत्वात् न च तस्य घटत्वं निरूपितत्वं नास्तीति वाच्यं। निरूपितत्वस्य स्वरूपसंबं
धविशेषत्वेन अक्त्ते समवायघटत्वनिरूपितत्वं नास्तीति वाच्यं निरूपितत्वस्य स्वरूपसं २०
१ बंधअक्त्ते समवायघटत्वस्वरूपयोः स्वरूपसंबंधत्वानपायात् इति भावः। घटत्वस्य घट
मात्रधर्मत्वव्यवस्थापकं तु राज्ञावेष्टितमाह। तस्मादिति। अस्तु घटत्वादिना निर्धर्मितो स्वरूपवि
शेषनियततामन्यत्र घटादिव्यवहारजनिका। तथापि तन्मते अविद्यादेर्जातित्वे किमागतं

२

इत्याशंक्याविद्यादेर्जातित्वकल्पने लाघवमिति तन्मतानुवादपूर्वकं स्वमतं विविच्य कथयति। अ
त इति। यस्माद्व्यक्तौ विशेषमनवेक्ष्य जातिसंबंधमात्रेण तत्तद्व्यवहारो नोपपद्येत तस्मात् व्यक्तौ
इत्यर्थः। जातितद्वत्तिमतां तद्व्यवहारः घटादिव्यवहारः फलितमाह। इति नेति। नन्वविद्यादिरूपजा
तेः तत्तद्व्यक्तौ तत्तद्विशेषमवलंब्य तत्तद्व्यवहारजनकत्वे संशयानुपपत्तिरनवस्था च स्यादिति आ
शंकां निरासं प्रतिजानीते एतेनेति वक्ष्यमाणेनेत्यर्थः। इति निरस्तमित्यनेन संबंधः। इतिशब्दो
क्तं पूर्वपक्षं विकल्पमुखेनोपपादयति। व्यक्तिविशेष इत्यादिना इदमिति संशयप्रयोजकधर्मि
ज्ञान इत्यर्थः। विशेषाग्रहाभावे व्यक्तिज्ञानं हेतुः स्थाणुत्वादीति यथा करादिविशेषज्ञाने पुरुषत्वा
दिसंशयो न भवति तथा अत्रापीत्यर्थः। व्यक्तिज्ञानमात्रेण कथं विशेषाग्रहाभावः तत्राह। गृह्यमाणे
ति। स्थाणुत्वादिविशेषत्वादिति स्थाणुत्वादिव्यवस्थापकविशेषत्वादित्यर्थः। द्वितीये विशेषस्य व्य
ल क्तिधर्मत्वपक्षे तस्यापि व्यक्तिधर्मविशेषस्यापि। उभयपक्षानंगीकारेण तृतीयं वदन्नेतेनेत्ये
तद्विवृणोति। व्यवस्थितेति पदार्थविशेषे नियततायः घटादिव्यवहारस्तेन व्यक्तौ यो विशेषस्तत्त
द्व्यवहारप्रयोजको धर्मः तस्य व्यवस्थानियमेनावस्थानं तस्य निराकार्यत्वादिति संबंधः विकल्प्य।

अ॰ टी॰ ३२ द्वयोक्तं दूषणं परिहरति भेदाभेदाभ्यामिति व्यक्तिगतस्य विशेषस्य व्यक्तितो भिन्नाभिन्नविलक्ष
णत्वेनानिर्वचनीयत्वात् भेदाभेदप्रयुक्तदोषासंस्पर्शिहिमित्यर्थः । अवयविलक्षणं पदार्थमसह
मानं प्रतिबंधं निरायेण हतवापीति आवश्यकत्वं पूर्वोक्तप्रकारेण व्यक्तिरेव विशेष इत्यर्थः स्ति
नूपद्वेसंशयानुपपत्तिं प्रकारांतरेण परिहरति किंचेति । ननु अवयवातिरिक्तावयव्यभा
वे स्तंभावयवशब्दादपुनरुक्तस्तंभशब्दवाच्यं किं तत्राह । साधारणेति पदार्थांतरानिरावयव
विसदृशा असाधारणः यथा पुरुषे करचरणादयः स्थाणौ वक्रकोटरादयः तथापि कथं तत्र वक्ता
तेन स्थाणुत्वादिसंशयानुपपत्तिः तत्राह । इदमिति तीति तावतामवयवानां समुदायस्य स्फुरणे नहे
तुतायद्यपि इदमिति ज्ञाने पुरोवर्त्यवयवसमुदायः स्फुरत्येव तथापि दोषवशादितरव्या
वर्त्तकासाधारणावयवास्फुरणात् संशयोपपत्तिरिति भावः अवयविसद्भावमंगीकृत्यापि सं
शयानुपपत्तिं परिहर्त्तुमनिकारं चयति । अपि चेत्यादिना । संगतिग्रहो वाच्यवाचकसंबंध
ग्रहः अस्पष्टनिर्णये हेतुः पुरोस्थितिः सः संशयः एवं सतीति इदमिति ज्ञानस्य व्यक्तिरूपविशेषनि
श्चायकत्वे संशयानुपपत्तिरित्यर्थः तत्र हेतुः पदार्थेति व्यक्तिमात्रनिश्चयस्य संशयविरो

११

संगतिग्रहोत्तरकालं इष्टापत्तिं मत्वा नेत्युक्तं पदादिशब्द संगतिग्रहणात्प्रागिति २

धित्वात् तदुक्तीत्युक्तं पटपदसंबंधनिश्चयः स्वरूपं पट इति निश्चयः विशिष्टज्ञानत्वात् स च
पुरोवर्त्तिनि पटादौ विद्यत एवेति तद्विरोधी संशयो न स्यादिति भावः संशयस्याप्यविषयत्वमाशंक्य
निराकरोति न चेति संशयस्य वाच्यत्वविषयत्वेऽपपत्तिमाह तच्चेति तद्वाच्यत्वं तत्र पटेऽज्ञातसंगति
ग्रहात्प्रागित्यर्थः न चेत्यत्र हेतुमाह । एवमपीत्यादिना अन्यविषयस्य संशयस्यान्यविषयत्वकल्पनम
युक्तमित्येवमपीत्युक्ते तद्वाच्यत्वं पटशब्दवाच्यत्वे आदिशब्देन शब्दसंबंधो गृह्यते तेन तत्र पटशब्दवाच्य
त्वप्रविष्टपटादिषु मध्ये तच्छब्दः पटवाचकः शब्दः प्रकारस्तदात्मकवर्णद्वयं तत्वतश्च वाचा
तानवितानात्मकं पटस्वरूपे निश्चिन्वतो । नतत्संजवतीति परिहरति न पट इति पटशब्दप्रयो
क्तृत्वस्वरूपात्स्वरूपांतरमंकां व्यावर्त्तयति तदतिरिक्तेति यथा न वन्मते घटं न जानामीति अज्ञान
विषयघटत्वोपचकसाक्षिणो न घटसंशयविरोधित्वं यथा वा प्रमेयत्वेन प्रकारकनिश्चयस्य न
तथात्वं तथा एतादृशशब्दत्वप्रकारकनिश्चयस्य न वाच्यत्वप्रकारकसंशयनिवर्त्तकत्वमिति शं
कते तथापीति तत्र हेतुमाह तदंशे इति वाच्यत्वांशे इत्यर्थः । अनवधारणात् अनिश्चयरू
पत्वात् । साम्येनोत्तरयति । नहीति । व्यक्तीति व्यक्तिस्वरूपाभिन्नविशेषविषयकमपीत्यर्थः त
थाविधमिति व्यक्तिस्वरूपविशेषे अनिश्चयात्मकमित्यर्थः वर्त्तितसंशयः स्थाणुत्वादिसंशयः न

अद्वै. टी.
३२
ख्या

नु इदमित्यादिज्ञानस्यैकेवलविशेषविषयकस्य कथं न निश्चयत्वं। प्रमेयत्वादिना निश्चयस्यैव
कथं प्रमेयविशेषांशेन मात्रं निश्चयः तथा चेन्न्यासदशोत्पन्नस्य जलादिज्ञानस्य। कर्मब्रह्म
विचारप्रयोजकस्य प्रयुक्ते न विषयमपि तत्सांगाधीतवेदवाक्यात् अपातततउत्पन्नकर्मब्रह्म
ज्ञानस्यापि निश्चयत्वप्रसंगात् प्रवृत्तिरिति चेत् तर्हि जलादौ विशये संशयो न स्यात् उभयमीमांसा
रंभोपि व्यर्थः स्यात् सदिग्धे न्यायः प्रवर्त्तते इति हि सर्वसंमतं ननु तत्र तत्र ज्ञानस्याविनिश्चयरूप
त्वात् न तत्र दर्थसंशयः किं तर्हि तत्प्रामाण्यसंशयादेवाति चेत् न प्रामाण्यसंशयविशयधर्मिरूपज्ञा
नस्य निश्चयत्वे तदर्थसंशयहेतुकप्रामाण्यसंशयस्यापि अनवकाशात् तथा हि जलज्ञानस्य प्रा
माण्यं तावत् जलत्ववति जलत्वप्रकारत्वं तत्र जलत्वप्रकारत्वं तावत् स्वान्तिरानुव्यवसायेन वा
भासते इति तद्दशेन संशयः। नापि विषयगतजलत्ववत्त्वांशे संशयः संभवति। इदं जलमिति ज्ञा
नस्य निश्चयरूपस्य तद्विरोधिनः सत्वात्। तस्मान्न जलज्ञानप्रामाण्यसंशयात्तदर्थसंशयः।। ३२
किंतु तस्यानवधारणात्मकत्वादेवेत्ति तच्च अनभ्यासदशापन्नस्थले अर्थसंशयानुपपत्त्या
१२ पूर्वोक्तमीमांसारंभानुपपत्त्या चानेककोटिकज्ञानत्वं च निश्चयत्वं किं तर्हि निश्चयत्वं तत्र एव। यज्ज्ञानं
यत्संशयनिवर्त्यनुकूलस्वरूपविशेषवत् तत् तेन निश्चय इति। ननु अनभ्यासदशापन्न

सदृशापन्नजलज्ञानयोः प्रामाण्यादिना तद्विशेषाभावात् कथं संशयनिवर्त्यनुकूलानुकूलस्वरूपविशेष
वत्त्वमिति चेत् उच्यते अस्त्येवात्र तर्कादिजन्योऽसंभावनादिनिवृत्तिरूपो विषये विशेषः। इति तज्ज
न्ये ज्ञानेपि विशेष इति द्वितीयं निराकरोति नापीति दुर्निरूपत्वादिति धर्मिणः सकाशात् तद्भेदात्तद्द्वा
स्यातिविशेषः भिन्नत्वात्त्वावेहत्वं तरमाह तस्यैकस्यैतितथा हि न तावत् वाच्यत्वं द्रव्ये तद्वृत्ति गु
णकर्मत्वात्त्वा तन्नापि गुणकर्मणोः द्रव्यातिरिक्तेपि वर्त्तमानत्वात् नापि सामान्यादौ तस्मिन्नपि वर्त्त
मानत्वात् नाप्येवं उपाधिरूपे सामान्ये वर्त्तते एवं उपाधेरनुपदमेव निराकरिष्यमाणत्वात् पू
र्वमायाप्रत्यसत्ताया जातिरिति वदतापराजिमता जातिर्नास्तीत्युक्तं। इदानीं सर्वघटादिव्यक्तिवृत्ति
त्वं टेकजातौ पराज्जिमतं प्रमाणं दूषयति। नापीत्यादिना घट इत्यादीति अस्यविशिष्टमत्यर्त्तत्वे
न विशेषणविषयकत्वात् तच्च विशेषणं घटत्वं जातिरेवेति भावः वर्णितेति सदशिमलपटत्वा
दिव्यक्तिनियमार्थं कल्पिते तोयोयमेको विशेषः व्यक्तिरूपो वा विशेषः तद्विषयत्वयेत्यर्थः। उक्तत्वादि
ति व्यक्तिविशेषत्वादात्मापञ्चेयेव सत्तामायथा चजातिव्यवहार इति वदता अर्थादुक्तमि
त्यर्थः। ननु यथा एकस्मिन् पटे पटोयं पटोयमित्यनुगतनानाबुद्धिरकमेव पटं विषयीकरोति

अभेदी
३२

तिष्वनानाव्यक्तिष्वपि तादृशी बुद्धिः एकविषयिणी इति जातिसिद्धिरिति अनुमानाभिप्रायेणाह
नन्वीति। ननु तत्तद्विषयेषु नीलपीतत्वादिमत्सु तेन विलक्षणेषु धर्मभेदस्य प्रत्यक्षसिद्धत्वात् बाधि
तमनुमानमिति तत्राह। धर्मभिन्नविशेष्यान्यमते क्वचेपि विशेषणीभूतपटत्वैकत्वमादाय ए
कधर्मविषयत्वरूपसाध्यसिद्धौ बाधानवतारादिति। बाध्यादिति अनुगतबुद्धीनां नानात्वस्य
सर्वसंमतत्वात् नैकसंजवतीत्यर्थः एकबुद्धेः एकविषयत्वव्याप्तिरपि व्यभिचारान्नास्तीत्या
ह। घटपटादि द्वित्तिन्तत्राप्येकां जातिं विषयीकरोतीति न वाच्यमिति सूचयति। विलक्षणेष्विति
एकेति किंमिदमाकारस्यैकत्वं तुल्यत्वं वा अभिन्नत्वं वा इति विकल्पाद्ये आह पटादीति पटत्वादिना
सदृशाकारत्वमात्रस्येत्यर्थः॥ तन्नानात्वेपीति। तुल्यानेकपटत्वविषयत्वेपीत्यर्थः अपरिह व
भ्रमरणे नानात्वेनैवोपपत्तेरित्यर्थः सादृश्यस्य भेदगर्भत्वादित्यभिप्रायः द्वितीये आह तदैक्यमि
१२ ति। यदि नानापटेषु एकं पटत्वं सिद्धं तदा नानापटबुद्धिष्वपि अभिन्नाकारत्वं सिद्ध्येत्। ३२
अभिन्नाकारत्वे सिद्धे तेनैकं पटत्वं सिद्धमित्यन्योन्याश्रय इति भावः ननु नवत्वं यत्किंचित्
बुद्धेरनुगतत्वं तद्विषयेषु पटादिषु विशिष्टबुद्धिविषयत्वेन पटत्वादि विशेषणं सिद्ध्येत्

१२

लाघवादेकमेव सिध्यतीति अथवा ननु नानापटबुद्धिषु विशिष्टबुद्धित्वेन सिद्धं यद्विशेषणं तत्
तं पटत्वं तस्मिन् नानात्वकल्पनातो लाघवादेकत्वमेव सिध्यतीति अभिन्नाकारत्वे हेतोरान्योन्या
श्रय इति शंकते लाघवादिति। विपरीतमेव लाघवमिति परिहरति नेति कल्प्यमानपटत्वादिजा
तिव्यवस्थार्थं क्लृप्तं यत्स्वरूपं व्यक्तिस्वरूपविशेषः तदतिरिक्तैकधर्मकल्पनायामित्यर्थः एवं
सति द्वितीयशंकापि नावतरति विषयगताकारनानात्वे प्रमाणसिद्धे विषयिषु एकाकारत्व
स्य असंभावितत्वात् इति ननु यथा असंसर्गाग्रहापेक्षया विशिष्टज्ञानस्य लघुतया प्रवृत्तिं
प्रतिकारणत्वं स्वीकृतं पश्चात्तन्निर्वाहार्थं अयथार्थप्रवृत्तिनिमित्तं ज्ञानमस्तत् ज्ञानेन तत्कारणं
दोषादिकं च स्वीकृतं गुरुशरीरमपि फलमुखं गौरवं न दोषायेति सर्ववादिसिद्धं। यथा वा अ
वयवावयव्यादिषु पंचसु स्थलेषु लाघवेन एकं समवायसंबंधं कल्पयित्वा पश्चात्समवाय
स्य संबंधिसंबंधसिद्ध्यर्थं स्वरूपसंबंधाः कल्प्यंते तथा अनुगतबुद्ध्यनुरोधेन सकलव्यक्ति
षु एकां जातिं कल्पयित्वा लाघवस्यार्थं व्यक्तिगतानेकविशेषकल्पनागौरवं न दोषायेति चेत्।
न एकस्मिन् अनंतानां प्रामाणिकविशेषपरंपरापादकत्वे नैतादृशगौरवस्याप्रामाणिकत्वात्

अद्वै०टी १४

ननु व्यक्तिविशेषवादिनस्तवाप्येष दोषः समान इति चेन्न नमन्मते विशेषस्य व्यक्तिस्वरूपाद् नान्य
त्वाद्भेदस्यापि दुर्निरूपत्वादनवस्थापादकत्वाभावात् अत्यन्तासिद्धत्वेन कल्प्यत्वाच्चानुमानापि त
द्वैतस्येति चेत्तर्हि तेषां व्यक्तिरूपविशेषाणां अत्यन्तासिद्धत्वे नलेरेव जातित्वेन विविधव्यवहारोप
पत्तावलं त्वदभिमतजात्या किंच ऐक्ये प्रमाणं नावेत्प्रमाणानुग्राहको लाघवतर्कोप्यकिंचित्कर इ
त्याह। प्रमाणानपेक्षितस्येति। नानात्वस्य प्रमाणसिद्धत्वादपि तर्कमात्रान्नैक्यसिद्धिरित्याह अन्यैरपि।
परोयं परोयमिति समानाकारबुद्धीनां नानापटत्वविषयत्वेनाप्युपपत्तेर्नानुभवबाधोपीत्याह
नचेति उक्तरीत्येति घटत्वाद्याकारमात्रस्यैवत्रोक्तत्वेत्यर्थः ननु नानुमानस्य सत्प्रतिपक्षत्वं लाघव
तर्कानुग्राहप्रमाणत्वाभावादसिद्ध इत्याशंक्य निराकरोतीति नचेत्यादिना। किं घट इति बुद्धिविषयत्व ३४
प्रयोजको घटत्वजातिर्नो विशेषो घटत्वशब्दवाच्यः पक्षः उतजातिर्न्न नाद्य इत्याह घट इति पूर्वादिभ्यो
व्यावर्तस्य विशेषस्य घटस्वरूपाद्भिन्नत्वे तद्व्यवस्थापकविशेषपरंपरापातादित्यर्थः एवं
वत्वव्य इत्यर्थः नचैवं घटविशेषशब्दयोः पर्यायतापत्तिरिति वाच्यः आह स्वरूपान्यकेति। घटस्वरूपा
न्नोन्नेदस्य अत्यन्तासिद्धत्वादिति भावः जातेरेकत्वे प्रमाणं तर्कमाशंक्य निराकरोति। नापीति घटादिनि

तद्धि २ ॥१ निरितिवाच्यं अस्मन्मते तस्य व्यक्तेः सकाशादुद्दाभेदाभ्यां दुर्निरूपत्वेनैतद्दोषानवकाशा २

ष्ठदंडनिरूपितकार्यतायेन धर्मेणावच्छिद्यते। पटादिभ्यो व्यावर्त्यतेसकार्यतावच्छेदको धर्मः त
स्य नावः कार्यतावच्छेदकता एवं कारणतावच्छेदकतापि। अनुगतासकलकार्यवृत्तिरेका। अयमा
शयः अन्यूनानतिरिक्तवृत्तेरेवावच्छेदकत्वात् तत्वस्य च यत्किंचिद्व्यक्तिमात्रवृत्तित्वे संत्रवात्स
कलकार्यव्यक्तिवृत्तिः सधर्मो जातिरूपः सिद्ध्यतीति। अस्मन्मते सत्वासत्वादिनाऽनिर्वचनीयत्वा
र्यत्वधर्मस्वीकारात्परमत इत्युक्तं। तत्तद्व्यक्तिस्वरूपत्वं तस्य कार्यत्वस्य सकलव्यक्त्यनुस्यूतध
र्मानपेक्षत्वं विपक्षबाधकमुखेन व्यनक्ति अन्यथेति व्यक्तिस्वरूपकार्यत्वस्यानुस्यूतधर्मापेक्षि
त्वे। तद्धर्मस्य सकलघटवृत्तिधर्मस्य तेनातिप्रसक्तधर्मेण तत्कार्यताअस्तैकव्यक्तिनि
ष्ठकार्यतानिरूपणं तन्मात्रवृत्तित्वनिश्चयः ननु कथं कार्यत्वं स्वरूपानतिरिक्तं अस्त्येनताव
द्धेतज्जातिरूपं द्रव्यत्वादिनासांकर्यात्। नाप्युपाधिरूपं तत्किं अखंडं सखंडं वा। नाद्यः जगतित
स्यासत्वात् अन्यथाजनावच्छस्यापि अखंडोपाधित्वापत्तौ तत्समवायिनोत्तावत्वापत्तेः॥
जातिमात्रविलोपापत्तेश्च। नापि द्वितीयः तत्किं कारणोत्तरकालवृत्तित्वं अन्यथानाद्यः।
कार्यत्वकारणत्वयोरन्योन्यापेक्षसिद्धिकत्वप्रसंगात् नांत्यः निरूपितत्वमशक्यत्वात् तत्तत्वं
ज्ञानं धर्मित्वप्रवृत्तौ तस्य सखंडधर्मस्य तत्त्ववृत्त्यसंयोगाच्चावात् किंचकार्यत्वमतिरिक्तमिष्टं तो

हति

अद्वै॰ टी तथा च स्वरूपकोव्यक्तौ विशेषो वस्तुपमन्तुपेय इति तेनैव तत्साध्यव्यवहारोपपत्तौ किं तेन नन्वे
वमस्त्विति वाच्यं तस्यापि स्वरूपातिरिक्तत्वे विशेषपरंपरापातादित्यत सर्वमत्तित्रेत्याह॥
२५ नहीत्ति उक्तं दूषणं पक्षान्तरेप्यत्तिदिशति एवमिति। तत्समयेत वसिद्धान्ते तद्धजादितिकारणं
तस्य कारणतावच्छेदकापेक्षितत्वलादित्यर्थः। नास्ति हि जातिसिद्धिः जातौ प्रमाणविशेषमा
शंकनिषेधतिनापीति पटशब्दस्तावत् सर्वपटव्यक्तौ वाच्यवाचकसंबंधेन वर्त्तते एवं
ऌध्य६ च घटव्यक्तिषु ~~[illegible]~~ तत्र वर्तते तन्निमित्तं वक्तव्यं अन्यथातिप्रसंगात् अतो यत्सकलपट
व्यक्तिनिष्ठं तन्निमित्तं तदेव पटत्वजातिरित्यर्थः सर्वपटव्यक्तिषु येनुगम्यमानाः द्वीरा
दिमाधुर्यवद्विशेषतो निर्वक्तुमशक्याः तत्तत्व्यक्तिस्वरूपाविशेषास्तैरेव। निमित्तैः
पटशब्दप्रवृत्तौ संभवत्यां किं त्वदुक्तेन जात्येति परिहारः विषयत्वात् निमित्तत्वादित्यर्थः २५
पटादिशब्दप्रवृत्तिनिमित्तत्वेन जातिस्वीकारपक्षं निरात्तत्य सर्वोपसंहारेण पटादि
संगतिग्रहार्थं जातिस्वीकार इति पक्षमु[illegible]प्यनिराकर्त्तुमुपक्रमते नचेति। अपूर्वसंगति
२५ ग्रहकाले असंनिहीता। कथमित्याक्षेपे। शब्दान्तिधेयाशब्दोपस्थाप्या। तत्रकारणन्नाव

द्रा२

२५

हेतुमाह। तत्रेति संगतिर्वाच्यवाचकत्वावलक्षणः संबंधः न वा व्यक्तिस्तत्र प्रतिबंदीसद्भावं हेतु
माह। जातिपक्षेचेति याशब्दोप्यर्थः कथंशब्दसूचिता जातिपक्षेसंगतिग्रहानुपपत्तिं विवृणोति नहि
तिजातिसद्भावपक्षेसंगतिग्रहोपपत्तिं शंकते नन्विति सा अपूर्वव्यक्तिः तेन संगतिग्रहेण त[illegible] क्रः ३
संनिकृष्टे घटे वा त्वेन घटमानयेत्यादुत्तमवृद्धशब्दश्रवणसमनंतरं मध्यमवृद्धस्य घटानयना
दौ प्रवर्त्तिं दृष्ट्वा इयं प्रवृत्तिः स्वविषयज्ञानसाध्या प्रवृत्तित्वादस्मदीयप्रवृत्तिवदिति प्र
वृत्तिसाधनज्ञानमनुमीयते। तस्य च ज्ञानस्योत्तमवृद्धप्रयुक्तशब्दविषयकज्ञानान्वयव्य
तिरेकानुविधायकार्यत्वेन तत्कारणकत्वमप्यनुगम्यते। गृहीतं च कारणत्वे सएवमुपपादय
ति। घटपदप्रयुक्तं वा कांस्यपात्रकंबुग्रीवादिमद्वस्तु आनयति तद्[illegible]रेण पटपदप्रयोगः पातान
वितानात्मकमानयति। अतो [illegible]स्मिन् वाक्ये घटमिति भागः कंबुग्रीवादिमद्वस्तुविशेषज्ञान
जनकः एवमावापोद्वारेण आनयनभागोपि क्रियाविशेषज्ञानजनक इति एवं कृतिपर्यवसाने
सर्वपदानां तत्तद्व्यक्तिविशेषज्ञानजनकत्वमवधारयन्ति तत्तद्ज्ञानजनिकाशक्तिरेव तत्तत्स्या
दानां तत्तदर्थसंगतिः तद्ग्रहश्च संगतिग्रहः सचसंगतिग्रह एकस्यां व्यक्तौ न संभवति प्रयोगा
तरेप्यक्तंतरानुगतत्वात् प्रसंगोत्ते। किंतु अतीतानागतसर्वव्यक्त्युपसंहारेणैव सर्वव्यक्त्युपस्थिति

द्रा२

अ॰ टी॰ चक्षुःसंबंधघटत्वस्य सर्वघटव्यक्तिषु संबद्धत्वात्। तेनैव चक्षुषः सकलघटसंबंधत्वे
न सामान्येन सकलघटविषयकचाक्षुषज्ञानजननादिति तदेवं प्रतीतानागतसर्वव्यक्त्युप
३६ संहारेण व्याप्तिसंगतिग्रहस्य सामान्यलक्षणप्रत्यासत्तिस्वीकारेण विनाऽयोगात् तत्सिद्धं गोत्वा
दिसामान्यमिति परस्य हृदयं। तदेतद्दूषयति। सामान्यमपीत्यादिना। प्रत्यासत्तिर्हि वर्त्तमानो
विवप्रत्यासत्त्युपस्थापयति च चक्षुर्घटप्रत्यासत्तौ तयाद्भूतत्वात् तदेतदुक्तं तदाश्रयसमवायिन
मिति विपक्षे दोषमभिसंधायाह प्रत्यासत्ताविति तदीयत्वस्येति। प्रत्यायनकाले विद्यमानप्र
४१ त्यासंबंधित्वस्यैवार्थः प्रत्ययकाले विद्यमानप्रत्यासत्त्या संबंधस्यापि प्रत्यायकत्वेनेति प्रसंगा
दिति भावः। सामान्यलक्षणप्रत्यासत्तिजन्यज्ञानकाले सामान्यस्य सकलव्यक्तिसंबंधेन
सत्त्ववत्त्वमुपपादयति नहीति। अनुत्पन्नेत्येतदतीतेत्यस्याप्युपलक्षणं एतेन प्रसिद्धधूमव्यक्ति ३६
ग्रहालवह्निसंबंधस्य पुंसस्तदनुदयकाले धूमो वह्निव्याप्तत्वसंदेहो जायते धूमो वह्निव्या
प्तो न वेति सामान्यलक्षणां विना नैतत्संभवति तथाहि प्रसिद्धधूमेषु वह्निसंबंधस्य निश्चयात् देवा
प्रसिद्धधूमे वह्निसंबंधसंशयमाहायसर्वैतत्व्यः। अप्रसिद्धधूमव्यक्त्युपस्थितिश्च सामान्यल
१६

क्षणं विना न सिध्यतीति निरस्तं। सामान्यस्यातीतानागतव्यक्तिसंबंधाभावेन तद्ज्ञानजन
कत्वाभावयोगात् नहि घटासंबंधश्चक्षुःसंयोगो घटज्ञानजनने प्रत्यासत्तिरुच्यते किंच पूर्वं धू
मो वह्निव्याप्य इति निश्चयाभावेन तत्कारकसंशये प्रसिद्धधूमे चैव ज्ञायमाने किं बाधकं न हि
धूमे वह्निसंबंधितामात्रं तत्र व्याप्यत्वं किंतु धूमत्वावच्छिन्नवह्निसंबंधिताकत्वमेव तत्र तत्किंहि
यात् पूर्वं न निर्धारितमिति कथं तत्संशयो न स्यात् पूर्वं हि अयं धूमो वह्निसंबंधी स्याद्याकारे
ण महानसीयधूमत्वावच्छेदेन वह्निसंबंधो गृहीतो न धूमत्वावच्छेदेनेति तत्सामा
न्यलक्षणया। ननु सामान्यलक्षणाभावे तोऽजनोर्थिनोऽनागतपाकेकथं प्रवृत्तिः अज्ञाते पुरुष
प्रयत्नविषयत्वायोगात् तस्मात्साकल्यसामान्यलक्षणयाप्रत्यासत्त्याऽनागतपाकविषयं ज्ञा
नं च वक्तव्यमेवेति चेत् न प्रकारांतरेणापि तत्संभवात् तथाहि भविष्यत्कालः पाकाधारः व्य
वहारकालत्वात् वर्त्तमानकालवदित्यादौ यद्वा पाकत्वं अनागतवृत्ति अनित्यवृत्तिनित्यधर्मत्वात्
घटत्वादिति वत्। इति। नापि प्रौढप्रकाशकयावत्तेजःसंसर्गाभावरूपस्य तमसो ज्ञानार्थं
सामान्यलक्षणापेक्षा। प्रकाशकातीतानागततेजसां प्रतियोगिभूतानां अभावज्ञानकारणी
भूतज्ञानानां तया विना ज्ञानस्यासंभवादिति वाच्यं। रूपादिमत्त्वेन सामान्येनैव न च तस्य भाव

पदस्य शाक्यासिद्धत्वात् ऽभावेऽपि किंतस्य तेजोऽन्तावकूटत्वं किं वा तेजःसमान्याभावत्वं ना
द्यः ऽन्यावकूटाभावस्य धावृकूटत्वनियमेनैकाज्ञेकसद्भावे तमोऽन्तावप्रतीतिर्न स्या
त्। तमःप्रतीतिश्चोभयत्र न स्यादिति कष्टं हि शामापन्नो यं सामान्यप्रत्यासत्तिवादीन्नद्वैतियत्सामा
न्यान्तावस्यास्तन्निरनभ्युपगमात्। जातिसिद्धौ प्रकारान्तरमाशंकते। नन्विति। वकृव्यवहारेघ
टो घटशब्दवाच्य इति घटत्वप्रकारकसंगतिग्रहः प्रयोगं तदेतत्प्रकारकपदार्थस्मृतिः घट
त्वप्रकारकवाक्यार्थबोधश्चेति त्रयाणां समानप्रकारकत्वं समानप्रकारकता च एकप्रकार
कतालयाच परस्परं तादृशजातिसिद्धिरिति भावः। एतावता च मम मते शब्दस्यापूर्वस्म
र्तिबोधकत्वमप्यागतं इत्याह। एवं चेति। ऽविरोधे हेतुमाह पटःपटशब्दवाच्य इति ऽन्वय
साधारणः यस्यामेव व्यक्तौ संगतिग्रहस्तामेव व्यक्तिं शब्द उपस्थापयतीति न नियमः किंतु य
त्प्रकारकः संगतिग्रहः तत्प्रकारकमेव पदार्थस्मरणादिकं जनयन् देशकालसमभिव्याहारा
द पूर्वामपि व्यक्तिमुपस्थापयति। ऽतो घटत्वादिप्रकारकसंगतिग्रहात्तत्प्रकारकवाक्यार्थोन्न
ता पूर्वव्यक्त्युपस्थानं न विरुद्धमिति। दूषयति तर्हीति। संगतिग्रहादीनां सामानप्रकारकत्व

मपेक्षितं न तु समानविषयत्वं सामान्यलक्षणाप्रत्यासत्तिदूषणेन तदुपायान्तावात्। अत एव
सामान्यलक्षणाजन्यज्ञानस्य जलत्वादिकार्यकरत्वे रजतत्वेन गृह्यमाणे कस्मिंश्चित्तेनाग्रह
णे संनिहिते रजतान्तरे प्रवृत्तिप्रसंगश्च। न चोभयमप्यपेक्षितं गौरवात् लघुप्रकारे समा
नत्वमेकत्वं न तद्भावेनुपपत्त्यभावात् किंतु तुल्यत्वं। सदृशप्रकारे रे जातिप्रसंगावारणात्
इत्याह मुधेति न चैवं गौरवदोषावकाशः कूटत्वव्यक्त्यात्मकविशेषे रेवकस्य मान्यजाति चतुर्व्य
वहारोपपत्तौ गौरवविपरीतसम्भोक्तत्वात् इत्याशयवानाह उक्तरीत्येति। ननु धूमसामान्याव
च्छिन्नं वह्निसामान्यव्याप्यं ऽन्यथा पूर्वं धूमेन वह्न्यनुमितिर्न स्यात्। तच्च सामान्यमेकधू
मत्वजातिरेवेति चेत्तत्राह। एतेनेति सामान्यपुरस्कारेण या व्याप्तिः सा निरस्ता दृष्टव्येसर्थः
एतेनेत्यस्यार्थमाह ऽविशेषितेति एतच्च तत्तादिनोनानाव्यक्तिपितेषां सुरत्नि धूमत्वे तत्वत्वादि
विशेषणपरित्यागेन केवलधूमत्वाकारेणावच्छिन्नात् तत्तद्धूमनिष्ठात् तद्वह्नित्वावच्छिन्नव
ह्निनिरूपिता व्याप्तिरेव सामान्यव्याप्तिपदेनाभिधीयत इति भावः एवं सामान्यावच्छिन्नव्याप्ति
स्वरूपपर्यालोचनया पराजितमतानुस्यूतैकजातिरसंभव मुक्तासामान्यव्याप्तिग्रहपर्यालोच

×अविशेषितं यद्धूमत्वादि तन्निरूपितव्याप्तेरित्यर्थः तत्तद्व्यक्तिविशेषरूपाणां धूमत्वादीनां ४ ×

अवे॰टी
३८

न्याप्तिलमाह सामान्योपाधविति तद्विषयः अविशेषितनानाधूमत्वावच्छिन्नलत्तधूमनि
ष्ठव्याप्तिग्रहएवविषयो यस्य घटव्यवहारस्य स तद्विषयइत्यर्थः पटादिशब्दस्य नानार्थत्व
परिहारान्यथानुपपत्त्यापरजितमत जातिसिद्धिरित्याशंकां कामनूद्य तन्निरासं प्रतिजानीते
प्रतएवेत्यादिना निरस्तमित्यंतेन अतएवेत्यस्यार्थमाह परस्यरेति। प्रवृत्तशब्दवाच्यानांतद्विदि
यपाद्यादिव्यक्तीनां तत्तदिंद्रियत्वादिजातीनां चात्यंतविलक्षणत्वेनानुगम्यमानत्वात् तत्र वद्दश
ष्टो नानार्थः पटादिशब्दस्तु न तथाविलक्षणार्थकः। जातिवादिनापि शब्दोपस्थितेकधर्मावच्छि
न्नार्थविषयत्वेनैवैकार्थत्वं वक्तव्यं नैकार्थविषयत्वेन पटादिव्यक्तीनामनेकत्वानिवारणात् तथैकस्मा
कमपि पटादिशब्दोपस्थितावच्छिन्नधर्मावच्छिन्नार्थवाचकत्वेनानादिपदवैलक्षण्यान्न परा
दिशब्दस्य नानार्थत्वमित्यभिप्रेत्याह नत्विति परा जितमतानुसृतैकजातिनिराकरणमुपसंह ३८
रति तस्मादिति उपलक्षणप्रमाणप्रयोजनयोर्निरस्तत्वं तदिच्छाप्रत्यर्थः प्रत्यंताश्रयरहिताजातिर्नैव
प्रसिध्यति। प्राक्तिलेकत्वजावत्वादिलीढानीनिरूप्यते। एवमित्यादिना। तन्नाश्रयत्वेन संज्ञा
१८ विलमनूद्य दूषयति नलावदित्यादिना स्वरूपेण दूलसानपेक्षरूपेणत तदाश्रयाः पटहाश्रयाः प्रत्यक्ष
पक्षाना वेहेतुमाह तंतुदितिसमवायसंबंधेनविद्यमानस्य शुक्लः पट इतिवत्सामानाधिकर
१८

त्वे प्रतीतेरिति भावः। अथवा तंतुषु पटत्वाप्रतीतेरित्यर्थः। द्वितीये पूर्वोक्तदूषणेसत्यपि दूषणांतर
माह। तत्संयोगस्येति सविशेषणेहिविधिनिषेधौ विशेषणमुपसंक्रामतो विशेष्यबाधे इतिन्यायेन
एवंयुक्तानां तंतूनां पटत्वाश्रयत्वे बाधिते संयोग एव पर्यवसीतीति संयोगस्यैवयुक्तं यत्र पटत्वं तत्र द्रव्यत्व वस्य ३
मितिव्याप्तिः संयोगस्य पटत्वाश्रयत्वे द्रव्यत्वप्रसंगइत्यर्थः तदतिरिक्ते अननुगतमेवमनुक्तेनोही
तिन्नलत्वइवेतिव्यतिरेके दृष्टांतः अतिरिक्तावयव्यनुपलंभोसिद्ध इतिशंकतेनन्विति। नानुविलस्य
तंतुषु महानित्यादिना संबंधः नच तंतुषु महत्वैकत्वबुद्धिस्तंतुविषयिणीतंतु धर्मविरुद्धधर्मावगाहि
त्वादित्याह। स्तस्तेषु नानेति यद्यपि स्तम्भेषु नाना तंतुषु महत्वैकत्वव्यवहारो न संभवति तथापि संयु
क्तेषु तंतुषु परिशेषाद्विषयनीत्याभिप्रेत्याभिलक्ष्यतायमाने महत्वं संयुक्ततंतुदेशाधिकपरिमाणवयविध
र्मः किंवा तद्देशानधिकपरिमाणोवयविधर्म इति विकल्प्य आद्ये सिद्धिमाहनेति। संयोगविशेषवंतो
येतंतवइत्यर्थः कुविंदग्रहस्थापरीक्षितं तंतुसंयोगव्यावृत्त्यर्थं विशेषपदं। तस्य तवपदशब्दवा
च्यत्वेनाभिमतस्य तंतुन्यः संयोगविशेषवद्भ्यः महत्वासिद्धेः धर्म्यभावादित्यर्थः धर्म्यभावे हेतु
माह द्रव्यानुपलंभेनेति। ननु संयुक्ततंतुसमुदायादधिकदेशव्यापिमहत्परिमाणवत्पदार्थानु
पलंभेपि तंतुसमुदायदेशव्याप्युपलभ्यमानमहत्त्वाश्रयोवयवीस्वीकर्तव्यः तंतूनां प्रत्येकं

२८

अद्वै. टी

३८

सूक्ष्मत्वेन तत्संयोगानामपि सूक्ष्मसंयोगित्वे [illegible] समात्रव्यापित्वेन गुरुत्वेन च तदाश्रयत्वायोगात्तद्
त्ति द्वितीयपक्षं निराकरोति तावदेवेति। अनुन्नवस्यान्यथासिद्धत्वादिति [illegible]: संबंधः महत्वानुन्नव
स्य महत्वव्यवहारस्य महत्वतदाश्रयाभावेपि महानवयवीति व्यवहारे परमतेऽसिद्धं दृष्टांतमाह
कार्पासेति न च पुष्टं तान्तसिद्धिः विजातीयावयवारब्धावयविस्वीकारे तस्मिन्नवयविनि तांत
वत्वकौशेयत्वकंबलत्वादिसंकरापत्तेः परमते महानवयवीति तत्र व्यवहारः संयुक्तावयवसमु
दायविषय एवेत्याह परमत इति। किंचायं त्वदभिमतावयवी अवयवानामाकाशादिवदंतः घटा
दिवत् उपरि वा तिष्ठति नाद्य इत्याह किं चेति। [illegible] तस्थत्वे चेति। मूर्त्तानां समानदेशत्वाभावविरोधे
नतंतुस्वरूपान्तःस्थितत्वं न संभवतीत्यर्थः किं चावयविनोवयवान्तस्थत्वमसंभवि चेत्युक्तं महान
वयवीति। अल्पपरिमाणे वस्तुनि महत्परिमाणस्य सर्वथा प्रवेशादर्शनादिति भावः। द्वितीयमु
प त्थापयति तस्मिन्निति बहिस्तिष्ठतीत्यर्थः। ततः किमित्यत आह एवं चेति संहतेन निबिडेन निरंतराव ३८
यवैरारब्धेनेति यावत् पटः आमा[illegible]दयति स्वावयवत्वं तु व्यवधायकः न दृश्यंते तत्राजवत्तिसं
हतद्रव्यत्वात् कुड्यादिवदिति ततः किमित्यत आह। चक्षुषेति। निकृष्टगतिकस्योत्किमन्तु घटदूषयति।
तंतु परतति तन्तूनाम सर्वाहिरप्यवृत्तिः पटो नाम किं न दृश्यते [illegible] व्यवधायकत्वानुमाने

ञ

२८

व्यवधीयमानानवयविक्त्वमुपाधिमाशंक्य निराकरोति न चेति। उपाधेः साध्यसमव्याप्तत्वान्
यादिति भावः नव्यंतरालस्य संहतद्रव्यत्वे सतीति विशेषणं तु समव्याप्तत्वमिति चेन्न। तर्हि लाघवेन
तावन्मात्रस्यैव साध्यप्रयोजकत्वे संभवति व्यवधीयमानानवयवित्वं प्रयोजककोटौ न निवेशनी
यमित्याह। अंतरालस्येति। विपक्षे बाधकमाह। अन्यथेति। अवयविनोवयवान्व्यवधायकत्वे
इत्यर्थः ततः किं तत्राह। द्वितीयावदिति न चेष्टापत्तिः अनुन्नवविरोधात्। अवयविनो बहिर्भागदेशा
वृत्तित्वे दूषणांतरमाह। एवमिति। न देशो तस्य पटस्य तंतुरूपे देशे [illegible]त्यर्थः। तदवच्छिन्नेति
तेन पटेनावच्छिन्ने आकाशे गगनादिदेशे आदिशब्देन दिगादिग्रहः। अपि ना तंतूपरि तदतिरिक्त
पटानुपलंभात्। तत्र कल्पनायोग्यत्वं सूचयति। संयोगाभावप्रसंजने हेतुमाह। संहतेति। समा
नदेशे एकदेशे। पटस्य बहिर्वृत्तित्वपक्षे तंतूपरिदेशे वा तंतुद्वयमध्ये वा वृत्तिरिति विकल्प्याद्यं दूष
यित्वा द्वितीयं दूषयति तथेति। आरंभकं पटोत्पादकं। निष्पावो बीजविशेषः। आदिपदेन माषा
दिग्रहः। तद्दलद्वयं निष्पावादिदलद्वयं तंतुद्वयस्य विभागः स्यादिति संबंधः तत्र हेतुः तेनेति स्व
शब्देन तंतुद्वयमुच्यते तथा चोत्पद्यमान पटावयवित्वं तं तुद्वयक्रिययावा। उत्पद्यमानावयवि

मा

अद्वै॰टी॰ ४०

तत्तंतुद्वयावयवविनाशाद्वा तंतुद्वयविनाशः स्यादिति भावः फलितमाह तत्रेति। असमवायि
कारणनाशस्य कार्यनाशप्रयोजकत्वादिति भावः न च संयोगांतरात्पटोत्पत्तिः तज्जनककर्मादिव्या
पारस्यासत्वादित्याह। संयोजकेति। किंच संयोगांतराद् उत्पन्नमपि पटांतरं पूर्वपटसमानयोगक्षे
मत्वादनुत्पन्नसममेवस्यात्। इत्युक्तिरेत्याह इतिकेति। ननु उत्पद्यमानावयवी स्वासमवायिकारण
नाशयितुं स्वयं द्वितीयक्षणे नाशं नुपजनो गोचरतां गमिष्यतीत्याशंक्य दोषमाह। उपजन्यमानो वेति
न चैतदपीष्टं ज्ञानोत्तरकालमेव नाशानुपजनात्। क्षणिकवादापाताच्च। न च कारणीभूततंतुसंयोग
नाशकत्वं कार्यस्य न दृष्टमिति वाच्यमित्याह स्वारंभकेति निःष्पावबीजदलद्वयसंयोगो हि अंकुरका
रणमिति अन्वयव्यतिरेकाभ्यां दृष्टं विनाशकत्वं तु द्यत्त दृष्टेरिति भावः। ननु कार्यस्य स्वासमवायि
कारणनाशकत्वं न दृष्टं निःष्पावदलद्वयसंयोगस्तु अंकुरे निमित्तमेवेत्यत आह स्वेति। अग्निघाते ४०
ति। स्पर्शवत् वेगवद्द्रव्यसंयोगो ऽभिघातः तज्जन्यया अग्निद्रव्यमाने घटादौ क्रियया तस्यां स्वासम
वायीकारणीभूताग्निसंयोगनाशकत्व दृष्टेरित्यर्थः। ननु क्रियाया असमवायिकारणना
शकत्वे दृष्टेपि द्रव्यस्य न तथात्वमित्याशंक्याह न चेति। अदृष्टत्वस्य विचार्यमाणे वस्तुनि अलंका
रत्वान्न तत्र द्रव्यमात्रस्य स्वासमवायिकारणनाशकत्वसाधकमिति हेतुमाह। तस्यैवेति निर्मूल

४ क्रियावद्द्रव्यस्य द्रव्यांतरसंयोगविशेषः ४

तिकस्याशंकामनुवदति यदि चेति। स तर्हि सकलतंतूपरि वा समवैतीत्यस्यैकतंतुषु वा। नाद्यः तंतूनाम
अत्यक्ततापातेत्वात्। अत एव नहीत्तानीयोपीतिमतो दूषणांतरमाह तदेति। प्रत्येकं तंतूनामुपरि विद्य
मानो मध्ये चाविद्यमानो द्वैधीभावेन वस्यादिति नमहत्वं न वैकत्वमित्यर्थः नानातंतूनां पटारंभकत्वमत
स्य समर्थनं चेत्याह। अपि चेति तत्रत्येषु पूर्वपटारंभकतंतुषु असमवाये हेतुः मूर्त्तयोरिति। अग्निमप
टारंभकाले पूर्वारब्धः पटो विद्यत एवेत्यसिद्धमित्याशंक्याह। न चेति। तैः पूर्वपटारंभकैस्तंतुभिः। तत्र तंतुषु तं
तरं संयोगे सतीत्यर्थः न चेत्यत्र हेतुमाह। समवायीति। परैकत्रयकारणैकतरनाशं विनाद्रव्यनाशानु
पगमादिति भावः। असमवायिकारणस्य च मसिद्धमित्याशंक्याह। न च तंतुष्विति। वेमाद्यवयवनक्रियाविशे
षः संयोगि क्रियायाः। संयोगनाशकत्वं घटादौ दृष्टमिति भावः। नेत्यत्र हेतुमाह। दृष्टेति। दृष्टं वेष्टितोऽयमारब्धः
पटः तदारंभकत्वं तु प्रदेशोष्विस्यर्थः। ननु तं चेतरसंयुक्तपूर्वपटादेव पटांतरोत्पत्तिरस्तु तथा च न समान
देशविरोधः। स्थूलपटस्यैव स्थूलपटसमवायित्वादिति चेन्न परे विजातीयावयवारब्धेकावयव्य
नंगीकारात्तत्तंतुसंयोगनाशमंगीकृत्याप्याह। एवमिति पूर्वपटारंभकतंतुसंयोगनाशानंतरं तेषुप
टजनककर्मादिव्यापारादृष्टेस्तेषु पटोनोत्पद्येतेत्यर्थः पटस्यतंत्वारब्धे त्वेनुपपत्त्यंतरमाह किंचेति।
ततः तंतुभ्यः तद्रूपे सत्यां। तत्र पेत्वयात्र हेतुमाह कार्यस्वेति। असमवेतमहद्दीर्घद्रूव्यादिनिरणत्वस्य

अद्वै॰ टी॰ द्व्यणुकोत्पत्तिदर्शनात् परमतदुक्तं। ननु उपादानो(पा)देययोर्न्यूनाधिकपरिमाणत्वं यदुपन्यस्तं तद्
ह्रस्वत्वे तदुपष्टम्भः। तन्त्वपेक्षया पटो महानिति प्रतीतेः दीर्घत्वं च महत्त्वानतिरिक्तं नोपादानमर्हतीत्याशं
४२ क्याह। दैर्घ्यं चेति। परिमाणं महत्त्वातिरिक्तमिति शेषः। चातुर्विध्यं। अणुमहद्दीर्घह्रस्वात्मकं। वस्तुतस्तु।
परिमाणव्यवस्थापकस्य रूपविशेषादेव तत्तद्व्यवहारोपपत्तौ अतिरिक्तपरिमाणे प्रमाणाभावमभिप्रे
त्य परैरित्युक्तं। किंचायमवयवी तंत्ववयवसमवेतो वा तंतुसमवेतो वा स्यात्। नाद्यः। एकस्य युगप
त्कार्यद्वयोपादानत्वासंभवात्। अंत्ये च अधिकदैर्घ्यवत्त्वमिश्रीतपुष्पग्रथ्यादेरिव प्रत्येकं तंतूनां पूर्वापेक्ष
या स्थौल्यं संदृश्येतेत्याह तंत्ववयवेति। तंत्ववयवसमवेतत्वे तंतुषु पूर्वापेक्षया स्थौल्यापादनायो
गात् तंत्ववयवासमवेतस्येत्युक्तं। इतरथा पटस्य तंतुत्वोत्पत्तिरित्युपहार्यांतरं चेन्न तत्त्वमित्याह। एवं
तुल्यितेति। तंत्ववयवातिरिक्तावयविनं स्वीकुर्वताप्यवस्थायां द्व्यणुकस्वीकारात् तत्तंतुकल्प ४२
मप्यासिकमुपलभ्येतेत्यर्थः। आदिपदेन गुणांतरपरिग्रहः। आरंभवादः कुतो दोषयुक्तियुक्तो न वेत्य
र्थेत्यारभ्य पटस्येव न दृश्येतावयवयोः यतः ननु कथं तत्प्राप्तेः पूर्वं अवयवादर्शनं कपालादि
समुदायरूपस्य मृत्पिंडादेस्तद्वैरूप्यलभ्यमानत्वात्तैरेव मृत्पिंडरूपैः कपालैः कुलालादिव्यापारेण
संयोगविशेषवद्भिः तत्तदाकारघटादिजननात्। एवं चेत् द्व्यणुकालानां कार्याणां संहतित्वात्। नैक

घटादेः

२२

स्यापीह कार्यस्य प्रत्यक्षत्वं प्रसिद्ध्यति। यदि मृत्पिंडः कपालरूपावयवसमुदाय एव नावयवी। तदा
कपालानामपि अवयवित्वे प्रमाणप्रयोजनयोरभावात् स्वावयवसमुदायात्मकत्वमेव वक्तव्यं। एवं त
त्तदवयवानामपीति द्व्यणुकपर्यंतं सर्वमवयवजातमवयवसमुदायात्मकमेव स्यात्। तथा च द्व्यणु
कस्य परमाणुसमुदायात्मकत्वात्तत्कार्यत्वेनाभिमतं त्र्यणुकमपि परमाणुसमुदायत्वात्मकमेव
वक्तव्यं अन्यथा इत्याचतुरणुकादीनां मृत्पिंडांतानां परमाणुसमुदायत्वमेव प्राप्नोति। तथा च सर्वमप्र
त्यक्षं स्यात्। अप्रत्यक्षसमुदायस्य प्रत्यक्षत्वादर्शनादनभ्युपगमाच्च। किंच मृत्पिंडांतानां कार्याणामव
यवसमुदायात्मकत्वमंगीकृत्य तत्समानयोगक्षेमस्य घटस्यैकस्यैव तदनंगीकारे युक्तिकौशलं
तव बाधितं। ननु अस्तु मृत्पिंडावयवविरूपैरिदवयवैरेव कपालशब्दवाच्यैः कुलालव्यापारानंत
रं पिंडे नष्टेषु टिति घट आरभ्यत इति चेत्। मैवं साजात्ययुक्तेषु समवायिकारणेष्विह एकजातीयका
र्यस्य हेतुत्वं दृश्यते यतः। यदि पिंडारंभका एवावयवा घटं जनयेरन् तदा घटस्य मृत्पिंडसजातीयसं
गः। न हि तंतुजातीयतंत्वारब्धे कार्ये पटत्वातिरिक्ता जातिर्दृश्यते उपपद्यते वा। ननु पिंडावयवैः कपाला
नि द्रव्यांतराण्यारभ्यंते तैश्च घट इति पिंडापेक्षया घटे वैजात्यसिद्धिरिति चेत् नैतदप्युपपन्नं स्याद्गौरवदो
षप्रसंगतः कपालरूपकार्याणां पिंडत्वस्यानिवारणात् पिंडात्कुंभसमुत्पत्तावारंभवादो न युज्यते। अदृष्ट

अद्वै.टी. कस्यचिदेकस्य बाधो वानेकस्य चेत्यर्थं। एकस्मात्पिण्डात् घटोत्पत्तिः स्वीक्रियते चेत्तर्हि संयोगस्य द्विवानेकस
मवायिकारणत्वे त्यक्तप्रायस्य चास्य घटेऽसंजनप्रसंगः। किंच एकस्य द्रव्यस्य समवायिकारणत्व महत्त्वं क
४२ ल्पितं स्यात्। परादेर्द्व्यो। तथानेककारणकत्वे घटे बाधितं स्यात्तथा च घटादावारंभकानिरूपणे
द्वारंभवादोन युज्यते इत्येतत्सर्वमभिप्रेत्यावयविखंडनमुपसंहरति। तस्मादिति। उक्तयुक्तिभ्य इ
त्यर्थः। अवयविनिराकरणकाले राम्रया सिद्धिः फलतीत्याह यस्मिन्निति। गूढाभिसंधिरवयवौवादि वि५
शंकते नन्विति। सर्वस्याप्यनुपलापत्तिर्गूढो भिसंधिः। एवं उक्तरीत्या परादिकार्यस्यासत्वे सत्य
त्यर्थः। नस्यात्। अन्नावापार्दयुक्तेरत्रापि सत्वादिति भावः। यथाक्रममाद्दाय परिहरति। सत्यमि
ति। स्वाभिसंधिमुद्घाटयति। तहीत्यादिना सर्वस्य कार्यद्रव्यस्याणुसमुदायरूपत्वमुक्तरीत्याद्र
ष्टव्यं। अणुसद्भाववादेऽस्मिन्नप्रमाणं नोपलभ्यते इति प्रसंगमात्रस्य वक्तव्यात्पिंडकेति हितं। तथाहि ४२
२२ परमाणुसद्भावे किंप्रत्यक्षं मानं उतानुमानं नाद्यः तवाप्यसंमतेः ननु सर्गाद्यकालीनं कार्यजडो
पादानं कार्यत्वात् घटवत् इत्यनुमानाज्जडोपादानं सिद्धं तच्च दन्तिमं तच्चिद्भिन्नं परमाणुरूपं। से
त्स्यतीति चेत् न लाघवेनाकद्दन्तिमता ज्ञानस्यैव वक्ष्यमाणविधया एकस्यैतेन सिद्धेः त्वदन्तिमत
परमाणव प्रमाणत्वात्। न च लोदैकार्यद्रव्यस्यानेकावयवसंयोगारम्भत्वनियमादेकारम्भ २२

त्वं बाधितमित्यनेके परमाणवः। सेत्स्यंतीति वाच्यं। अनेकावयवारभ्यस्य तथात्वे पि एकावयवा
रभ्यस्यावयवसंयोगं विनाप्युपपत्तेस्तस्य द्व्युत्पत्तिमात्रेऽप्रयोजकत्वात्। यथा नवमते यत्कार्य
द्रव्यं तत्त्बहुकारणजन्यमिति व्याप्तिः परमाणुद्वयात् द्व्यणुकोत्पत्त्यनुरोधेन नज्यते। यथा वा यत्महत्
कार्यं तन्महद्द्रव्यादेव जायते इति व्याप्तिः द्व्यणुकेभ्यस्त्र्यणुकोत्पत्त्यनुरोधेनाप्रयोजकीक्रियते। त
द्वत् लाघवानुगृहीतसर्गाद्यकालीनजडोपादानानुमानसिद्धाज्ञानारंभकत्वानुरोधेन कार्यद्रव्य
स्यावयवसंयोगारम्भत्वव्याप्तेरपि अप्रयोजकत्वं किं न स्यात्। सर्वदा कार्यप्रसंगचोद्यस्यापि उद्बुद्ध
दृष्टाभावेन एकाविद्याकारणवादेऽनवकाशात्। अदृष्टोद्बोधस्याकस्मिकत्वचोद्यमपि मायावादे न्नू
णमेवेत्युक्तं। परमाणुकारणवादे पि सुषुप्तिप्रलयादौ द्व्यणुकानारंभे अदृष्टोद्बोधस्याश्रवणीय
त्वात्। ननु प्रलयारंभे आद्यकार्यस्योपादानीभूताज्ञानचैतन्ययोरनाशादसमवायिकारणीभूता
वयवसंयोगनाशादेव नाशो वक्तव्य इति सिद्धमवयवसंयोगारम्भत्वमाद्यकार्यस्येति चेन्न आद्य
कार्यस्थितिजनककर्मनाशादेव अक्षयादिसिद्धत्वनाशोपपत्तेः। किंच अवयवसंयोगस्यका
रणत्वयदिनापि संयोगत्वेन तस्य कारणत्वं न वक्तव्यं। अतिप्रसंगात् किंतु स्वावयवसंयोगत्वेन
तथा च स्वावयवानां कारणीभूतसंयोगावघोदकत्वेन तं तु त्वादेरिवाकारणत्वप्रसंगान्नावयव

× ७ उक्तानुमानबलात् सर्वकार्यद्रव्यस्य अनंतावयवत्वे सिद्धे कार्यद्रव्यारंभकस्य स्थूलसूक्ष्मव्यवस्थानस्यात्॥ ७२

अद्वै॰ टी॰ संयोगस्यासमवायिकारणत्वसंभवः ननु द्व्यणुकं स्वन्यूनपरिमाणद्रव्यारब्धं। कार्यद्रव्यत्वात् घट
४२ वदित्यनुमानात् द्व्यणुकन्यूनपरिमाणद्रव्यसिद्धौ तस्यापि कार्यत्वे कल्पनामानेनंतावयवकल्पनाप्रसंगः।
न चैतदिष्टं अनंतावयवारब्धत्वाविशेषात् इति निरवयवनित्यद्व्यणुकावयवपरमाणुसिद्धिरि
ति। अनित्यत्वे च तेषां पुनः सर्गादौ पृथिव्याद्युत्पादकसमवायिकारणत्वाभावेनोत्तरसर्गो न स्यादिति चे
न्न उच्यते। आश्रयासिद्धिर्लोहेतुस्वरूपासिद्धिर्वा तस्य व्यभिचारादिदोषान्तरस्यासाधयितुं दुहनः। नताव
त् त्वन्मतेऽणुकातिरिक्तातींद्रियद्व्यणुकसद्भावे प्रमाणमस्ति निच द्व्यणुकं कार्यद्रव्यारब्धं महाकार्यत्वात्
घटवदिति द्व्यणुकसिद्धिरिति वाच्यं विपक्षबाधकाभावेनाप्रयोजकत्वात् न चाणुकमहत्त्वान्यथानुपपा
त्तिरेव विपक्षबाधकं। अणुकमहत्त्वस्य त्वदभिमतपरमाणुबहुत्वेनाप्युपपत्तेः। अणुकानां द्व्यणुकजन्य
त्वेपि तन्महत्त्वस्य द्व्यणुकबहुत्वस्याश्रयणीयत्वात्। नहि बहुत्वं द्व्यणुकैरेव अणुकमारंभणीयं न पर ४२
२२ माणुभिरित्यत्र नियामकमस्ति। ननु कारणगतसंख्यायाः कार्यगतमहत्त्वारंभकत्वं प्रसिद्धं तस्याश्चा
रंभकसंख्याया अपकर्षविश्रांतिभूमिर्वक्तव्या। सातिशयत्वात्। नहि बहुत्वं॥ यथा महत्त्वस्य सातिशय
स्य अपकर्षविश्रांतिभूमिः अणुकं। न च सोपकर्षः त्रित्वे विश्राम्यतीति तत्रोप्यपत्तत्वसंख्यायाः सत्त्वात्॥
तिर्हि एकत्वे सत्त्वविश्राम्यतु। न एकस्य पदार्थस्यानारंभकत्वेन तद्गतसंख्याया अप्यारंभकत्वायोग्यत्वा २२

त् कारणगतगुणानामेवासमवायिकारणत्वेन कार्ये सजातीयगुणारंभकत्वात् तस्मात् द्वित्वसंख्याया एव का
वारंभकसंख्यापकर्षभूमित्वं वक्तव्यं तथा च द्वित्वसंख्यायाः अन्यत्र परिमाणारंभकत्वादर्शनात् परमाणुद्वि
त्वस्याश्रयजन्ये कार्ये द्व्यणुपरिमाणमारभत इति वक्तव्यं। तथा च सिद्धं द्व्यणुकं। ननु द्वित्वसंख्याया अन्यत्र
त्रानारंभकत्वमसिद्धं। अतिस्थूलकपालद्वयारब्धे घटे महत्परिमाणारंभकत्वदर्शनात्। इति चेत् न तत्र द्वि
त्वसंख्याया अनारंभकत्वात्। अन्यथा सूक्ष्मकपालैरारब्धघटापेक्षया स्थूलद्विकपालारब्धघटस्य म
हत्त्वाभावप्रसंगात्। तस्मात् स्थूलद्विकपालारब्धघटे महत्त्वप्रयोजकं कारणमहत्त्वमेव न द्वित्वसंख्या।
इति चेत् न यथा आरंभिका संख्या सा सा महत्परिमाणारंभिकेति व्याप्तेरेकत्वसंख्याया द्वित्वसंख्या
या अपि परिमाणारंभायोग्यत्वेनारंभकसंख्यापकर्षस्य त्रित्व एव विश्रांतत्वात्। किं च द्वित्वस्याणुपरिमा
णारंभकत्वे कपालद्वयारब्धघटस्याप्यणुपरिमाणत्वप्रसंगः न च महत्त्वारंभककारणमहत्त्वेन प्रतिबंधा
त् त्र्यद्वित्वसंख्यानारंभिकेति वाच्यं विनिगमकाभावेन परस्परप्रतिबंधप्रसंगः। किं चैवं परमाणुसि
द्धौ आरंभकसंख्यापकर्षभूमित्वेन परमाणुद्वयारब्धाणुपरिमाणकद्व्यणुकसिद्धिः सिद्धे च द्व्यणुके तेन
स्त्रकानुमानेन परमाणुसिद्धिरित्यन्योन्याश्रयतापि स्यात्॥ अवयवसमुदायातिरिक्तावयविनो नैवे
हेतुनिनिरासात् कार्यद्रव्यस्य हेतोः स्वरूपासिद्धत्वमेव। अपि चायं हेतुर्दीर्घविस्तरपरारब्धे सूक्ष्मरूप
त्व ध

२

अद्वै॰ टी रज्वादौ व्यभिचारी॥ नच पराधारं बंध्यं रज्वादिकं पटादयपि रुध्यात् द्रव्यांतरं न जनयतीति वाच्यं। पटशब्दाद
४४ तिरिक्तरज्जुशब्दवाच्यस्य पटार्थक्रियातोतिरिक्त बंधनादिक्रियावत्तोपरज्ञानात् विपरिताकारज्ञानविष
यस्य स्वारंजकपटाद्भिन्नत्वकल्पनायोगात्। अन्यथा पटादेरपि स्वारंजकत्वं त्वतिरिक्तत्वे काष्ठत्यागः। तस्मा
न्नास्ति परमाणुसद्भावे प्रमाणमिति सिद्धं। आदिपदात्सत्प्रतिपक्षकृतिबाधौ द्रष्टव्यौ॥ एवं प्रमाणसद्भावा
द्द्वणोः सिद्धिः सुदुर्लभा बाधकस्य च सद्भावो गुरुकृत्योपाभिधीयते। तथाहि परमाणवो ऽसंयुक्ताः कार्यजन
काः संयुक्ता वा॥ नाद्यः अतिप्रसंगादनभ्युपगमाच्च। नांत्यः तत्संयोगस्य सनिमित्तानिमित्तविकल्पा
सहत्वात्। तथाहि। अनिमित्तत्वे सर्वदा द्व्यणुकोत्पत्तिप्रसंगः। निमित्तमपि दृष्टमदृष्टं वा। नाद्यः सर्गादा
वाद्यकर्मजनकनोदनाभिघातककार्यद्रव्याभावेन वेगाख्यसंस्कारजनकनिमित्ताभावेन गुरुत्वद्र र ४४
वत्वयोश्च सर्गाद्या क्रियाजनकत्वे अतिप्रसंगेन चादृष्टनिमित्तानिरूपणात्। नांत्यः अदृष्टस्यात्म
समवेतत्वेन परमाणुसंबंधाभावात्। स्वरूपसंबंधस्यासंबंधपर्यायत्वात्। नचादृष्टवदात्मसंबं
२४ धादेव परमाणुषु क्रियेति वाच्यं तस्य सर्वदा वर्तमानत्वेनोत्पादकालानियमप्रसंगात्। नचादृष्टमुद्बु
द्धं नास्तीति वाच्यं। उद्बोधकारणानिरूपणात्। न चेश्वर एव तदुद्बोधक इति वाच्यं। तस्यापि नित्यसि
द्धत्वेनानियमापत्तेः। तच्चिकीर्षाजयत्नयोरपि नित्यसिद्धत्वेन तद्दोषतादवस्थ्यात्। ननु विद्यमानम
त्ने

२३ २४

पि ईश्वरचिकीर्षादिकं अथ कालविशेषे अदृष्टोद्बोधकमपि चेत्। न एवं सति तदीयेश्वरस्यानीश्वर
त्वप्रसंगः यत्तच्चिकीर्षितमपि कर्तुमशक्तः प्रयत्नवानपि कार्यसंपादनाक्षम इति। नच कालविशेष एवादृष्ट
स्योद्बोधक इति वाच्यं। कालगतविशेषस्य कादाचित्कस्य नित्येश्वरचिकीर्षादिविषयस्य सर्वदोत्पत्तिप्र
संगेन पूर्वोक्तदोषतादवस्थ्यात्। तस्मात्सर्गादावाद्यकर्मासंभवात् द्व्यणुकोत्पादकसंयोगासंभवेन तद्वा
रेण परमाणूनां न जगत्कारणत्वं संभवति। किंचायं जायमानोपि परमाणुसंयोगो ऽव्याप्यवृत्तिर्व्या
प्यवृत्तिर्वा। नाद्यः वृक्षादौ संयोगतदभावावच्छेदकमूलाग्रादिप्रदेशवन्निरवयवे परमाणौ त
दसंभवेनाव्याप्यवृत्तिसंयोगनिरूपणात्। ननु अणुषु नानादिक्संबंधसत्वादेकदिक्संबंधावच्छेदेन
संयोगोऽपरदिक्संबंधावच्छेदेन तदभाव इति नोक्तदोष इति चेत्। परमाणुसंबंधवन्निरवयवेऽपि प
रमाणौ दिक्संबंधस्याप्यसंभवात्। नच दिक्संबंधेप्यवच्छेदकांतरं वाच्यं अनुपलंभात् कल्पने चा
नवस्थापातात्। नापि व्याप्यवृत्तिः। कुत्रापि तस्यादृष्टत्वात्। संयोगस्य व्याप्यवृत्तित्वे च कर्णशष्कुलीसं
योगस्यापि सर्वाकाशव्यापित्वेन व्यापक एवाकाशः श्रोत्रेंद्रियं स्यादिति सर्वेषां सर्वदा सर्वशब्दोपलंभप्रसं
गः। व्याप्यवृत्तित्वे च संयोगस्य परमाणुद्वयारब्धस्य परमाणुमात्रपरिमाणत्वप्रसंगः एकस्य बाह्या
भ्यंतराभावेन परमाणोरंतरव्यापनात्। बाधकप्रमाणाभावाच्च नाणुः सिध्यतीति यतः। अणुसंघाततो

अद्वै॰ टी॰
४५
पत्तिः कार्येणापाद्यतां ततः इत्येतत्सर्वमभिसंधायाह नेति। अणुत्वाभावादिति प्रमाणाभावबाधकस
द्भावाभ्यामसत्त्वादित्यर्थः। किं तर्हि जगन्मूलकारणमिति तत्राह निरवयवेत्यादिना। ब्रह्म विवर्त्तत इ
तिसंबंधः। विवर्त्तस्वरूपस्य जगतो ब्रह्मैव कारणमित्यर्थः। विवर्त्तो नामातात्त्विको ऽन्यथाभावः। कार
णस्वरूपानुपमर्द्दनेन कारणस्यान्यथाभावो वा। ब्रह्मणः कौटस्थ्यश्रुतिविरोधपरिहाराय विवर्त्तत इत्यु
क्तं पारमार्थिकविकाराभावस्यैव कूटस्थशब्दार्थत्वात्। विवर्त्तस्वरूपमाह वियदादीति। अवस्था
शब्देन वियदादयो ब्रह्मणो ऽवस्थाविशेषा एव देहस्य बाल्याद्यवस्थाविशेषवत् न पदार्थान्तराणी
ति सूचयति। ननु बालादिदेहस्यान्तर्देहस्तैनिः प्रमाणकः परिमाणस्यान्तर्देहोपि देहत्वेनानुमापकः
बालादिशरीरान्तर्देहे ऽबाधितं प्रमाणं नोपलभामहे प्रत्युत वैपरीत्ये प्रमाणमस्ति भिन्नपरिमा
णानां घटानां भेददृष्टेरिति उच्यते। प्रत्यभिज्ञैवान्तर्देहे मानं समीक्ष्यते। तां तत्त्वेबाधितं चास्याः मानं स्या ४५
दृप्रयोजकं। योहं बालोऽभूवं सोहमिदानीं युवेति प्रत्यभिज्ञैव मानं। न चास्या जातिविकल्पने कारण
मस्ति। प्रस्तुतजातिविकल्पनमेव बाधितं। राज्यादिभोगप्रापकादृष्टे सति तज्जन्मशरीरस्य नाशा
२५. संभवात्। अथ मशरीरे भुक्तस्याभ्यवहृतस्य शोणितसंनिपातादिकारणस्यासंभवाद्बाल्ययौवनादाविव सं
को बाधिकास्ति येन परिमाणान्तरोपपत्तौ तस्यान्तर्देहप्रयोजकत्वाभावात् प्रस्तुत एकस्मिन् शरीरे

त्रि

उद्भूतमध्याधः प्रदेशेषु नानापरिमाणदर्शनेन भिन्नपरिमाणवत्त्वस्यान्तर्देहे ऽप्रयोजकत्वाच्च। निरू
पपद ब्रह्मशब्दात् प्राप्तं त्रिविधपरिच्छेदशून्यत्वं व्यनक्ति परममहदिति विवर्त्तपदसूचितापरिणामित्वे
हेतुमाह निरवयवमिति। ननु कथं एकस्यासहायस्य क्रमेण वियदादिजगज्जनकत्वं लोके तादृशस्य कुला
लादेः कार्यजनकत्वादर्शनादित्याशंक्यावस्तुनो द्वितीयस्यासहायत्वेपि मायारूपदोषवशात् निद्रादोषा
भिभूतस्य स्वप्नप्रपंचविवर्त्तवत् ब्रह्मणो वियदादिप्रपंचरूपेण विवर्त्त इति स्मृतिपादोक्ताष्टमाधिकरण
सिद्धमर्थमाह। मायाशबलमिति। मायोपहितं तद्विशिष्टं वा। ननु मायाशबलं ब्रह्म किमिति कारण
मुच्यते सांख्यस्मृतिसिद्धायाः प्रकृतेरेव मायां तु प्रकृतिं विद्यादिति मायाशब्दवाच्यायाः कारणत्वं किं न
स्यात्। मैवं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेति श्रुत्यवगतेक्षत्यधिकरणे पोद्बलिते चेतनकार
णत्वाधपत्तेः। श्रुतिविरोधेन मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु वि
कारो न प्रकृतिर्न विकृतिरित्येवमाद्यायाः स्मृतेरप्रामाणिकत्वमिति दिक्। ननु मायास्वतंत्रैव जगतो हेतु
रिष्यतां। ब्रह्मण्यवगताशेषकारणत्वाविरोधिनी। यद्यपि पूर्वोक्तन्यायेन सांख्याभिमता प्रकृतिर्न कारणं
तथापि पौराणिकाभिमता नाध्यस्ता नित्या स्वतंत्रा श्रुतिसिद्धब्रह्मोपादानत्वाविरोधिनी मायाजगदुपादा
नं किं न स्यात्। अत एव सन् घटः स्फुरतीति प्रत्ययः कार्यजडांशं घटं अजडांशं सत्त्वस्फुरणं च विषयी करोति

अद्वै. टी ४६ इति चेत्। उच्यते। तस्या दृश्यायाः स्वतंत्रत्वं अद्वैतं बाधते यतः। उपक्रमादिभिर्लिंगैः सर्वोपनिषदां मते।
एकस्मिन्नेव पौराणिकाग्निमतायाः मायायाः स्वतंत्रतापत्तौ नैव घटते। उपक्रमोपसंहारादिषड्विधतात्पर्य
ग्राहकैर्लिंगैः श्रुतिभ्योऽवगतब्रह्माद्वैतं तस्य बाधप्रसंगात्। तथाहि। छांदोग्ये तावत् सदेव सोम्येद
मग्र आसीदित्युपक्रांतं। ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीत्युपसंहृतं। तयोश्च ब्रह्मात्मवि
षयतया ऐकरूप्यमेकं लिंगं। तथा तत्त्वमसीत्यस्यैव नववारं श्रोत्रं ब्रह्मविषयकोऽभ्यासो द्वितीयं लिंगं।
तत्त्वमसीत्युक्तस्य जीवब्रह्मैक्यस्य मानांतरागम्यत्वरूपमपूर्वत्वं तृतीयं लिंगं। एकविज्ञानात्सर्ववि
२५ ज्ञानरूपफलकथनं चतुर्थं लिंगं। सृष्टिस्थितिप्रलयप्रवेशनियमनाख्याः पंचार्थवादाः पंचमं
लिंगं। मृद्घटादिदृष्टांताः उपपत्तयः षष्ठं लिंगं। एवं सर्वोपनिषत्सु तात्पर्यग्राहकलिंगोपोद्बलितासु
ब्रह्मात्मैक्यं प्रतिपाद्यते। तच्चाद्वैतं मायायाः स्वातंत्र्ये बाध्येत। ननु कौ तर्हि सा मायायच्छबलं ब्रह्म ज ४६
गन्मूलकारणमित्युच्यते। तावद्रूपाज्ञानमित्याहुः। नन्विदं युक्तं तथाहि। स्वाश्रयव्यामोहिनी माया क
र्तृइच्छानुविधायिनी। तद्विरुद्धस्वभावेनाज्ञानेनानयोर्दृष्टान्तरूप्यं। यदुच्यते मायाविद्ययोरभेद इति तन्न
युज्यते तस्या अविद्यातो विरुद्धलक्षणलक्षितत्वात्। तथाहि मायावी तावत् स्वाश्रयस्य ऐंद्रजालिकपुरुषं न
व्यामोहयति। स्वकार्यद्वारा हर्षविषादादिकं न जनयति। तथा कर्तुः ऐंद्रजालिकस्येच्छां चानुविधत्ते। तदिच्छा
छां २६

यैव ऐंद्रजालिकतुरगादिरूपेण परिणमते तद्विपरीतलक्षणं चाज्ञानं तथा च ऐंद्रजालिकाव्यामोहकत्वव्यामोहकत्वा
भ्यां तदिच्छानुविधायित्वाननुविधायित्वाभ्यां च विरुद्धलक्षणाभ्यां परस्परं भिन्ने एव मायाज्ञाने। किंच माया
ज्ञाने विषयकव्यवहारयोरपि भेदस्तयोर्भेदे प्रमाणं। दृश्यते हि मायाजन्योयं ऐंद्रजालिकतुरगादिः अज्ञानज
न्योयं स्वप्नरज्जुरगादिरिति प्रयोगप्रत्ययरूपयो व्यवहारयोर्भेदः। स्वकार्यद्वारा स्वाश्रयाव्यामोहकत्वव्या
मोहकत्वरूपार्थक्रियारूपव्यवहारोपि भिन्न एवेत्युक्तं। मैवं प्रथमं लक्षणं तच्चाव्याप्त्यभावात् न चेष्य
ते। न द्वितीयमतिव्याप्तेरिति भेदो न युज्यते। यदुक्तं स्वाश्रयाव्यामोहकत्वं मायायाः लक्षणमिति। तन्न
अव्याप्तेः यतो मायाया अपि बाधनिश्चयप्रतीकारज्ञानरहिते मायिनि पुंसि मोहजनकत्वस्य लोके दृष्ट
त्वात्। श्रूयते च पुराणे द्रौमाहामायिनोपि श्रीरघुनाथस्य मायामोहितत्वं। अज्ञानस्यापि प्रतिबिंबादि
कार्यद्वारा स्वाश्रयाव्यामोहकत्वात्। अतिव्याप्तिश्च। नापि कर्तृवशवर्तित्वमपि तल्लक्षणं अविद्याया
अपि क्वचित्तत्सत्त्वेनातिव्याप्तेः। दृश्यते हि द्विचंद्रादिदर्शनं तथा च अंगुल्यवष्टंभेन सत्यविद्यायाः स्वका
र्यजननं कर्तुरिच्छया मंत्रौषधादिनिषेवणेन चैतुष्याया अविद्यायास्तु विषयकथनस्वप्नादिरूपका
र्यजनकत्वं। मायिनो मंत्रादिप्रयोगसमनंतरं तत्कार्यानिच्छायामपि तत्कार्यस्य दृष्टत्वाद्व्याप्तिश्च ए
वमविद्याया अपि प्रतिबिंबादिनास्वाश्रयाव्यामोहकत्वात्। कर्तुरिच्छानुविधायित्वाच्च। स्वाश्रयव्या

अद्वै० टी० मोहकत्वं कर्त्रिच्छानुविधायित्वलक्षणयोरव्याप्तिग्रस्तत्वादलक्षणत्वमेव। अतो मायाविद्ययोर्लक्षणभे
४७ दानिरूपणात्तद्भेदो युक्तितो न युज्यते। ननु एवं मायाविद्ययोर्भेदकादाचित्कस्वाश्रयाव्यामोहकत्वला
दृष्टं कर्त्रिच्छानुविधायित्वे च किं प्रयोजकं। उच्यते। कर्तृमयि कार्यबाधनिश्चयः प्रतीकारज्ञानवत्त्वं चे
ति वदंति। अत एव अविद्यायामपि प्रतिबिंबत्वमादौ बाधनिश्चयप्रतीकारज्ञानवत्तः कर्तुरव्यामोह
कत्वं कर्त्रिच्छानुविधायित्वं च दृश्यते तर्हि मायाविद्ययोरभेदप्रयोजकं लक्षणैक्यं वक्तव्यं। उच्यते। अनि
र्वचनीयस्वरूपस्य लक्षणत्वं तावद्द्वयोः समानमेव। ननु मणिमंत्रादिप्रयुक्तेष्वैंद्रजालिकादिपुरुषेषु
मायाविशब्दप्रयोगात् मणिमंत्राद्येव मायाशब्दवाच्यं। नचेष्टमिति। न मायाऽनिर्वचनीयेति चेत्।
न गजतुरंगादिमायिकवस्तूपादानीभूतविषयनिष्ठानिर्वचनीयमायाहेतुकमंत्रादिमत्पुरुषेमा
यासंबंधात् मायाविशब्दप्रयोगात्। उक्तमायासंबंधाज्ञानदशायां केवलमणिमंत्रादिमत्पुरुषे ४८
मायाविशब्दप्रयोगात्। न च गजतुरगाद्युपादानस्य मायात्वे गजादेः कथं मायाशब्दप्रयोग इति वा
२१ च्यं उपादानोपादेययोरभेदात्तदुपपत्तेः। केवलमणिमंत्रादावपि मायाशब्दप्रयोगोस्ति चेत्तर्हि तत्र
मायाहेतुत्वकल्पनयोपचारात्सोवगंतव्यः। विशेषणलक्षणमप्यनयोः समानं विशेषणलक्षणं नाम या
वद्द्रव्यं तावत्कालं धर्मतया ज्ञेयस्थितत्वात् तस्येतरव्यावर्त्तकत्वमर्थकं लक्षणं तत्तावद्वयोरविरोधित्वं॥
२१

लक्ष्यैकदाचित्संबंधमात्रेण लक्ष्यस्येतरव्यावर्त्तकं तदुपलक्षणं तच्च विपर्ययावभासकत्वं द्वयोः
समानं। इति लक्षणत्रयाभेदाद्वयोरभेद एव युक्त इति। यस्तु मायाविद्ययोर्व्यवहारभेदो दर्शितः सोप्य
न्यथासिद्ध एव। एकस्मिन्पुरुषे पितृत्वमातुलत्ववत्। एकस्मिन्नेवाज्ञाने विक्षेपप्राधान्येन विविधत्व
मायाव्यवहारभेदस्य। आवरणशक्तिप्राधान्येन त्वविद्याव्यवहारभेदस्य चोपपत्तेः। ब्रह्मण एव
प्रपंचकारणत्वे श्रुतिं प्रमाणयति। तद्धेति। श्रुतेरयमर्थः। तदिदं परिदृश्यमानं जगत्तर्हि तदा उ
त्पत्तेः प्राक् अव्याकृतं अनभिव्यक्तनामरूपात्मकं मायाबलं ब्रह्मैवासीदित्यर्थः॥ तदव्याकृतं जगत्
नामरूपेण च विशेष्य व्याक्रियत स्पष्टीकृतमेव ननु चेतन्मात्मनेत्येवकारार्थः। ब्रह्मणः सकाशात्तोत्तम
हाभूतपरमाणूनामुत्पत्तिशंकां व्यावर्त्तयति। एकैकमिति ब्रह्मणः सकाशादुत्पन्नं वियदादिकं नानानन्तव
र्तीत्यर्थः। प्रसंगात्संचोदकरणप्रक्रियामुपपादयितुमाह। महदपीति। महदपि ब्रह्मत्वाद्योग्यमिति संबंधः
तत्र हेतुः सूक्ष्मत्वादिति। ननु स्वीकृतं चेत्पृथिव्यादीनां ब्रह्मत्वाप्रतिबंधकं सूक्ष्मत्वं तर्हि घणुकगतस्याणुप
रिमाणपरमाणुपरिमाणयोरप्यनरपरिमाणवत्त्वमेव तेषां स्वीकृतं स्यादित्याशंक्य अणुकारणवादेन
तत्राह। सूक्ष्मता चेति। अणुपरिमाणातिरिक्तः स्वरूपविशेष एव सूक्ष्मत्वं तत्र प्रोक्तं लौकिकं च गमकमाह नित्य
मिति। श्रुतेरयमर्थः। नित्यं अविनाशि विविधं ब्रह्मादिस्थावरांतप्राणिभेदेन वर्तत इति विभुं। सर्वगतं। आकाशवत्॥
७३
४९

अद्वै. दी. ४८ व्यापकं। सुसूक्ष्मं। तादृग्विधरूपस्थूलत्वकारणरहितत्वात्॥ शब्दाद्येति। आकाशवाय्वादीनां उत्तरोत्त
रस्थूलत्वकारणानिलादित्वाभावात् सूक्ष्मतरत्वमित्यर्थः॥ लोकेपीति। समानपरिमाणयोः स्थूलसूक्ष्मत्वे
स्वानुगतवस्तिद्वैरेव। प्रसक्तयोग्योक्तिफलमाह। एवं चेति। पंचीकरणं तु श्रुत्यनिसंप्रदाये प्रसिद्धं। पंची
करणं संक्षिप्य कथयति। तत्रद्भूतेति। एकैकस्याकाशादिभूतार्द्धस्येतरभूतैकदेशसंयोगविशेषरू
पपंचीकरणवतीयावियदाद्यवस्थासा प्रत्यक्षयोग्या भवतीत्यर्थः। नत्वाकाशादीनां प्रत्येकं
सूक्ष्मत्वादप्रत्यक्षत्वेपि तेषामुत्तरोत्तरं प्रत्युपादानत्वेन पृथिवीभूतेसर्वेषां मिलितत्वात्तेन पंचीक
रणं विनापि प्रत्यक्षत्वं संभवतीति किं पंचीकरणेनेति चेत्। न पंचीकरणोपलक्षकत्रिवृत्करणश्रु
त्यनुरोधेन पंचीकरणजन्यसंयोगविशेषवतामेव तेषां प्रत्यक्षत्वोपगमात्। अन्यत्रापि संबंध
विशेषस्य व्यावहारिकं विशेषं प्रति प्रयोजकत्वस्य दृष्टत्वादित्याह। दृश्यतेहीति। तंतूनां परस्प ४८
रसंयोगे तदवयवानां च परस्परसंयोगे चेत्यर्थः॥ हीतिप्रसिद्धौ। विशेषमेव स्पष्टयति। तंतुरूप
येहीति। नैकतयेति। एकपदार्थतया न प्रतीयत इत्यर्थः। एकतयेति। एकोयं तंतुरिति प्रतीतिगोच
रा भवंतीत्यर्थः। यथा नानातंतवः संबद्धा अपि संयोगविशेषानापन्ना एकतया न प्रतीयंते तद्व
यवास्तु संयोगविशेषविशिष्टाः संत एकस्तंतुरिति बुद्धिविषयाः। तथा आकाशादयोपि उत्तरोत्तरो

२८

पादानत्वेन परस्परसंबद्धा अपि न प्रत्यक्षाः किंतु ईश्वरेण पंचीकृताः संतः संबंधविशेषमापन्नाः प्रत्य
प्रत्यक्षा इति श्रुत्यनुरोधेन कल्प्यत इति भावः। ननु पंचीकृतयोरपि वाय्वाकाशयोर्न प्रत्यक्षत्वं नीरूप
त्वेनेंद्रियागोचरत्वात्। तदन्यतमस्य द्रव्यस्याप्यगोचरत्वाच्च। स च प्रत्यक्षानवर्तित्वादिति कृतिरपि प्रयोजनार्थता
च कल्पत्वेन वाय्वाकाशावुपस्थापयति। भाष्यकारा अपि अप्रत्यक्षेपि ह्याकाशे बालास्तलमलिनता
द्यध्यस्यंतीत्याहुरिति चेत्। मैवं। प्रत्यक्षयोग्यत्वपदेन स्थूलशब्दादिकार्यकरत्वस्य विवक्षितत्वादि
त्यदोषः। यद्वा अस्त्येव वायोः त्वगिंद्रियप्रत्यक्षत्वं। शीतो वायुर्वातीति प्रतीतेस्त्वगिंद्रियान्वयव्यतिरे
कानुविधायित्वात्। अस्त्येव च प्रभामंडलाकारं चक्षुर्जन्यमानः करणस्यावच्छिन्नप्रभामंडलावच्छि
न्नाकाशस्य साक्षिभासत्वं प्रत्यक्षत्वेतिकृतिस्तु इतरत्रयापेक्षया स्पष्टत्वाभिप्राया। भाष्यकारवचनमपि अनव
च्छिन्नाकाशस्याप्रत्यक्षत्वाभिप्रायं। चक्षुराद्यविषयत्वाभिप्रायं वेति केचित्। प्रमाणफलजरादिस्वाश्रयस्या
प्यभावतः सत्ताव्याप्यापि लोजातिरिति सिद्धमितीरितं इत्याह। तस्मादिति न केवलं सत्ताव्याप्याद्रव्यत्वजाति
र्नास्ति अपितु द्रव्यत्वव्याप्यापि पृथिवीत्वादिजातिरपि नास्तीत्याह कापीति। अपरसामान्यं जातिरूपं उपा
धिरूपं चेति विकल्प्याद्यं दूषयित्वा द्वितीयं नाचं प्रतीजानीते नापीति। गोगोरिति एकाकारबुद्धासकलगोव्यक्ति
षु यदेकमनुगतं प्रतीयते तदुपाधिरूपमपि अपरसामान्यं न भवतीति व्याख्येयं। तेन नानुगतपदस्यैव य

अद्वै. टी र्थप्रतिज्ञातेर्थहेतुमाह ज्ञातेरिवेति। पूर्वोक्तरीत्या प्रमाणप्रयोजनाभ्यामाद्यसंभवादिति भावः। उपाधि
पक्षेऽसाधारणं दूषणमाह। उपाधेरिति। उपाधिः किमखंडः सखंडो वा नाद्यः। अभावत्वस्यापि तत्तापत्तेः
४९ इत्यत्रित्रेत्यद्वितीये प्रत्याह नानापदार्थेति घटत्वादिकं नानापदार्थघटितमुपाधिमिष्टता घटइतिबु
द्धिविषयत्वयोग्यत्वादिकमेव सखंडोपाधिस्वरूपं वक्तव्यं। तच्च न संभवति। घटत्वत्वादिपदार्थानां घ
टादावव्रत्तेरेकव्रत्तित्वस्यापि दुर्घटत्वादनेकव्रत्तित्वरूपमनुगतत्वं दूरापास्तमित्यर्थः। विश्वस्य सत्तो
नानाजातिमत्त्वमित्येतावांश्च हानेः परापरजातित्वमुक्तमुपपादितं चेनत्दुपसंहरन्। अनिर्वचनीयवि
यदाद्यवस्थांतरात्मनाविवर्त्तत्वहूस्त्रुक्तमनूद्यप्रपंजितमाह। अतइतिमहासत्ताकेवलस्यापि केवया
जातिः एतलद्व्यवहारस्यपलक्षणं यतउक्तप्रकारेण ब्रह्मातिरिक्तं जातिमात्रं न संभवति अतः अस्मा
द्ब्रह्मेतोरित्यर्थः। यथा सर्पादिरूपेण विवर्त्तमाना रज्जुस्तेन सर्पादिनाद्वैततां न प्राप्नोति। तथा वियदा ४९
द्यवस्यात्मनाविवर्त्तमानं ब्रह्मतेन वियदादिनाद्वैततां न आप्नोतीत्याह इत्यद्वैतमिति। ब्रह्मैव सद्ब्रह्म
व्यवहारगोचर इत्यर्थ इति युक्तवचनं प्रमाणयोति सबलेति। उक्तानिर्वचनीयस्य लक्षणं साध
नेत्यय। मानं च नेनवपश्यामइति प्रत्यवतिष्ठते। अनिर्वचनीय वियदाद्यवस्थांतरात्मनाविवर्त्तत
इति यदुक्तं तद्युक्तं तदयुक्तं। अनिर्वचनीयलक्षणस्य निरूपणात् इति पूर्वपक्षिसमन्यते। २८
लो म

ननुदोषादिजन्यत्वमेवे लक्षणमिथ्यात्वमेवं लक्षणे दोषाणां सर्वेषामिह सत्वतः। ननु संस्कार
दोषसंप्रयोगजन्यत्वमेवानिर्वचनीयस्य लक्षणं तथाहि असति प्रमातृ प्रमाण प्रमेयदोषज
पेरागकाचकामलादिसादृश्यान्यतरस्मिन् असति च पूर्वानुभवसंस्कारे असति वाक्षातार्थसंप्र
योगेमिथ्यारजतादिपदार्थानुत्पत्तेः सत्सु च तेषु तदुत्पत्तेः तज्जन्यत्वमेव लक्षणमिति मैवं लक्षणे
दोषाणामव्याप्त्यतिव्याप्त्यसंभवानामसत्वात्। तथाहि न तावत् प्रत्येकजन्यत्वलक्षणं अवि
द्यादावजन्येतदभावेनाव्याप्तेः किंच दोषादेः प्रत्येकं तत्रोपादानत्वं लक्षणे निमित्तत्वं वा। नाद्यः प्रमा
तृप्रमाणस्थरागकाचादिदोषाणां बहिष्ठं रजतं प्रत्युपादानत्वासंभवात् विषयस्थस्यापि सादृश्य
स्यगुणक्रियासमुदायरूपस्य कुत्राप्यनुपादानत्वेन असंभवापत्तेः दोषादेर्निमित्तत्वमपि अजन्ये
अविद्यादावुक्ताव्याप्त्यसंभवाभ्यामयुक्तमेव। दोषसाक्षात्कारेऽतिव्याप्तिश्च किंच संस्कारमात्रज
न्यत्वस्य लक्षणत्वे स्मृतावतिव्याप्तिरपि स्यात्। भावनाख्यसंस्कारस्य स्मृतिमात्रजनकत्वेनासंभ
वश्च। संप्रयोगमात्रजन्यत्वस्य लक्षणत्वे तत्स्यार्थोत्पादकत्वाभावात् असंभवः स्वाप्नानिर्वचनीयप
दार्थेषु व्याप्तिश्च न च तत्रापि मनःसंयोगोस्तीति वाच्यं। सुषुप्त्युत्तरकालीनाध्यस्तमनस्यव्याप्तेः।

+ अपिच प्रमात्रादिदोषस्य रजतादिज्ञानहेतुतया अन्यथासिद्धत्वेन रजताद्यर्थं प्रत्यहेतुत्वेनासंभवात्। ५

अद्वै.टी. तदध्यासात्पूर्वं तस्यैवासत्त्वेन तत्संयोगस्य बाधितत्वात्। ननु स्वप्नस्य स्मृतिरूपत्वात् शुक्ति
५० रजताध्यासवन्नापूर्वार्थविषयत्वमिति चेत् न। अपरोक्षतयानुभूयमानार्थस्य स्मर्यमाणत्वा
घा ज्ञानात्। न च स्मर्यमाणे परोक्षत्वमारोप्यत इति वाच्यं। आरोपिते परोक्षत्वे स्फीतालोकमध्यवर्ति
घटादेरिव स्मर्यमाणत्वेन तत्वाभिमते स्वाप्नपदार्थे स्फुटत्वं न स्यात्। अनावृतसंविदात्म्यं हि अ
र्थे स्फुटत्वं तच्च जाग्रत्पदार्थ इव स्वाप्नपदार्थेपि तुल्यं। न हि सेतुरपरोक्ष इति रामादिना सेतोरप
रोक्षत्वारोपेपि तन्निकटवर्तिनामिव सेतुः स्फुटतरो भवति। अत एव समुदितदोषादिजन्यत्व
मपि लक्षणं। ननु मिथ्याज्ञानविषयत्वमेवानिर्वचनीयत्वमिति चेत् किं तन्मिथ्याज्ञानत्वं दोष ५०
जन्यज्ञानत्वं। असद्विषयकज्ञानत्वं वा। भिन्नदेशकालस्थस्य तद्भिन्नदेशकालस्थतया विषयीकर्तृ
३० त्वं वा नाद्यः। अज्ञानादिभासकाजन्यसाक्षिज्ञानस्य मिथ्याज्ञानत्वाभावापत्तेः तद्विषयस्याज्ञा
नादेरनिर्वचनीयत्वाभावप्रसंगात्। न द्वितीयः बौद्धमतप्रवेशापातात्। किं च अतीतानागतार्थ
विषयकज्ञानस्यापि भ्रमत्वापत्तेः। मिथ्याज्ञानविषयस्यासतोऽपरोक्षत्वानुपपत्तेश्च। न तृती
यः। अन्यथाख्यातेरनभ्युपगमात्। ननु कथमन्यथाख्यातेरनभ्युपगमः। तथा हि अख्या
त्यादिमतेप्युपाधिविशिष्टज्ञानरूपिणी। अन्यथाख्यातिरिष्टैव प्रवृत्त्यादिदर्शनात्। अख्यात्य ३०

सत्ख्यात्यात्मख्यातीनामसंभवेन विशिष्टज्ञानरूपाया अन्यथाख्यातेः प्रवृत्तिनिवृत्तिहेतुत्वेनेष्टत्वा
त्। ननु कथं अख्यातेरसंभवः। उच्यते वक्तव्यं तावच्छुक्तिकादौ रजतार्थिप्रवृत्तिकारणमिदं रजत
मिति ज्ञानं तत्तावदनुभवस्मरणात्मकं ज्ञानद्वयं उभयसंमतसत्यस्थले ज्ञानद्वयात् प्रवृत्त्य
दर्शनात्। किं च इदमिति ग्रहणात्मकं ज्ञानं न रजतार्थिप्रवर्तकं। अतिप्रसंगात्। रजतमिति स्म
रणं च देशान्तरस्थरजतविषयकं न पुरोवर्तिनि प्रवर्तकं ज्ञानस्य स्वविषय एव प्रवर्तकत्वदर्शनात्।
नापि मिलितयोर्ग्रहणस्मरणयोः प्रवर्तकत्वं। तयोर्मेलनानुपपत्तेः। ननु वस्तुतो ग्रहणस्मरणात्म
३६१ कान्यौमिति रजतमिति च ज्ञानान्यौ दोषवशात् विशेषानवभासे तत्ताप्रमोषे च सति स्वरूपतो
विषयतश्चागृहीतभेदान्यां पुरोवर्तिरजतरूपैकवस्तुनी उपस्थाप्येते। तथा च इदमिति ज्ञानेन वि
षये पुरोवर्तिनि रजतमिति स्मरणविषयस्य देशान्तरस्थरजतस्य भेदाग्रहादेव प्रवृत्तिरिति न ज्ञा
नद्वयप्रवर्तकत्वोक्तदोष इति चेत् न। एवं अभावद्वयघटितभेदाग्रहापेक्षया लाघवेनैव विशि
ष्टज्ञानस्यैव प्रवर्तकत्वौचित्येन भ्रमस्थले तस्यैव कल्प्यमानत्वात्। ननु भ्रमस्थले विशिष्टज्ञा
नवादिनापि तत्कारणत्वेन भेदाग्रहस्यापेक्षणात् हेतोरवैयर्थ्यादिन्यायेन स एव प्रवर्तकोऽस्त्विति
चेत् न सत्यस्थले विशिष्टज्ञानभेदाग्रहयोर्लाघवेन [illegible] विशिष्टज्ञानस्यैव प्रवृत्तिकार

३ नापि बुद्धिस्थमेव शुक्तिरजतादिकं पुरोवर्त्तिविशिष्टतया प्रतीयत इति वाच्यं तद्बुद्धिरजतादेः परमार्थत्वे शरीरदाहादिप्रसंगात् आसत्वे वा ३
३ कृत्तदेशांतरीयरजतस्यैव आरोपोस्तु इत्युक्तं बुद्धिस्थासद्रजतकल्पनये ३

अद्वै॰टी णत्ता कल्पनात् तन्मनस्थले प्रवर्त्तकांतरकल्पनायोगात् न च सत्यप्रवृत्ताविव विशिष्टज्ञानं कारणं
५८ सत्यासत्यप्रवृत्तिवैचित्र्यस्य कारणवैचित्र्यप्रयोज्यत्वादिति वाच्यं लाघवेन प्रवृत्तिमात्रे विशिष्टज्ञा
नस्य कारणत्वे क्लृप्ते तद्वैचित्र्यादेव प्रवृत्तिवैचित्र्योपपत्तौ सत्यप्रवृत्तिरूपविशिष्टज्ञानकार्यता
वच्छेदके कल्प्यमाने गौरवापत्तेः तस्माद्विशिष्टज्ञानरूपाख्यातिरयथार्थप्रवृत्तिहेतुर्नास्तीति विव
हृतो ख्यातिवादिनो निरस्ताः नापि पुरोदेशे बाधविरोधेन देशांतरीयस्य च संयोगाभावेन त्वम
स्थलेऽसतो ज्ञानायोगात् असदेव रजतमत्रादिस्वनुभवानुरोधेन च असदेव रजतादिकं भास
त इति वाच्यं तस्यापरोक्षतायोगात् अन्यथा अतिप्रसंगात् न चासदेव रजतं सद्रूपशुक्तिको ५८
परक्तं भासत इति वाच्यं अत्यंतासतस्तदुपरागस्यैवासंभवात् असत्प्रतीतेश्चासदेव हेत्वंश
मात्रविषयत्वात् तथा च नासत्ख्यातिः संभवति नापि ज्ञानमेव रजतादिरूपं अन्यस्य रजत
स्य पुरोदेशे ज्ञानायोगादित्यात्मख्यातिमतं युक्तिसहं विषयनिषेधिरेवोत्तेहावरूपत्वेवं प्रतीतिस्तेन त भावात् ३X
त्रये शुक्तिकादौ रजतार्थिप्रवृत्त्यन्यथानुपपत्त्या सिद्धं यत्तस्मिन् तु रजतं विशिष्टज्ञानं तद्देशांतरी
यस्य कालांतरीयस्य वा रजतादेः वैशिष्ट्यमवगाहत इति सिद्धान्यथाख्यातिः कृपमनस्कमम हृति

ग्य
उच्यते सामग्र्यभावादन्यत्र प्रवृत्त्यापत्तिः तथा नान्यथाख्यातिरिष्टानः प्रमाणस्याप्यसंभवात् इय
मन्यथाख्यातिः प्रामाणिकैर्नेष्टव्या॥ अपरोक्षविशिष्टज्ञानरूपायास्तस्याः सामग्र्यसंभवात् तथाहि वि
शेषणसंनिकर्षस्तावत्तत्रान्वयव्यतिरेकसिद्धं कारणं न च देशांतरीयादिरजतेन चक्षुःसंनिकर्षः संभवति
ननु विशेषणज्ञानमेव कारणं तच्चात्र संस्कारस्मृत्यादिरूपं संभवतीति चेत् न कुक्षीषाद्याछन्नकुंडलेपुरु
षस्यापि विशिष्ट्यसंनिकर्षविशेषणसंसर्गाग्रहादौ विशेषणसंनिकर्षाभावापराधादेव विशिष्टज्ञानानु
त्पत्तेस्तस्यैव तत्कारणत्वोपगमात् न चोष्णीषाद्याच्छन्नकुंडलिन्यपि संततांतरकारकारणसहितकुंडल
रूपविशेषणज्ञाने संशयरूपकुंडलविशिष्टप्रत्यक्षमस्तीति वाच्यं विशिष्टनिश्चयस्यैवापाद्यमानत्वा
त् दोषादनिश्चय इति चेत् न कुंडलसंनिकर्षाभावातिरिक्तदोषानिरूपणात् तदतिरिक्तदोषक
ल्प्यमाने तद्वैवाच्छादनापगमे कुंडलविशिष्टप्रत्यक्षं न स्यात् न च विशिष्टापरोक्षप्रमायामेव वि
शेषणसंनिकर्षः कारणं नान्यत्रेति वाच्यं लाघवेन विशिष्टापरोक्षनिश्चयमात्रे तस्य हेतुत्वोपगमा
त् अन्यथा यथार्थप्रवृत्तावेव विशिष्टज्ञानं कारणं अयथार्थप्रवृत्तौ तु उपस्थितेष्टभेदाग्रह एव
कारणमिति वदंतं प्रति किमुत्तरं ते स्यात् किंच विशिष्टप्रत्यक्षे विशेष्यसन्निकर्षस्य कारणत्वमविशिष्टला मिष्ट
तस्य विषयसंनिकर्षत्वेनैव कारणता वाच्या विशेष्यत्वापेक्षया विषयत्वस्यैव लघुत्वात् ज्ञाने

अ.दी. ज्ञासमानत्वं हि विषयत्वं ज्ञानेन ज्ञासमानवैशिष्ट्यानुपयोगित्वं विशेष्यत्वं इति हि तन्मतं। विषय
५२ संनिकर्षोपि यावत्। विषयसंनिकर्षत्वेनैव कारणं॥ अन्यथा एकविशेष्यसंनिकर्षाद्बहुविष
यकसमूहालंबनेन प्रसंगात्। तथा च विशेषणस्यापि विषयविशेषत्वेन तत्संनिकर्षोपि कारण
मित्येषितव्यमेव। किंच विशेषणज्ञानस्य प्रत्यक्षहेतुत्वे पर्वतादावनुमितिसामग्र्यां सत्यामपि
वह्निविशिष्टप्रत्यक्षमेव स्यात्। विशेष्यरूपपर्वतसंनिकर्षस्य विशेषणवह्निज्ञानतद्वत्तया
संसर्गाग्रहरूपतत्सामग्र्याः सत्त्वात्। न चानुमितिसामग्र्याः सर्वत्र सत्त्वेन तस्या बलवत्त्वादनुमि
तिमात्रोत्पत्तेरिति वाच्यं। भिन्नविषये प्रत्यक्षापेक्षया नुमितिसामग्र्या बलवत्त्वेपि समा
नविषये संशयोत्तरप्रत्यक्षस्थले प्रत्यक्षसामग्र्या एव बलवत्त्वावधारणात्॥ अन्यथा पुरुष
त्वव्याप्यकरादिमानयं इति ज्ञानानंतरं ज्ञाविं पुरुषज्ञाने पुरुषं साक्षात्करोमीति तदनुव्यवसा ५२
३२ योन स्यात्। न चास्तु तर्हि पूर्वानुभूतरजतादिविषयकसंस्कारस्तद्विषयकस्मृतिर्वा प्रत्यासत्ति
रिति वाच्यं॥ विषयकरणोरजयसंबद्धस्यैव प्रत्यासत्तित्वात्॥ चक्षुर्घटादिसंयोगादिरूपायां
प्रत्यासत्तौ तथा दृष्टत्वात्। देशांतरीयरजतादिज्ञानादीनां चाचक्षुरादिना संबंधनिरूपणं च
इंद्रियार्थयोः असंबद्धस्यापि प्रत्यासत्तित्वे तिप्रसंगात्। रजतज्ञानस्य ज्ञानप्रत्यासत्तिजन्यत्वे
त्ति
३२

रजतं साक्षात्करोमीत्यनुव्यवसायोपि न स्यात्। सुरभिचंदनमिति वदोज्ञानप्रत्यासत्तिजन्यज्ञाने
सौरभांशे तथाऽदर्शनात्। ज्ञानप्रत्यासत्तौ वादिसंमतोदाहरणस्यापि निरूपणाच्च। तथा हि नेत्रावसुरभिचं
दनमिति ज्ञानं सौरभांशे ज्ञानप्रत्यासत्तिजन्यं। काष्ठविशेषे चंदनत्वनिश्चयं विना चंदने सौरभव्याप्तिनि
श्चयं च विना तादृशज्ञानानुदयेन सौरभांशस्य चंदनत्वलिंगकानुमितिविषयत्वात् सोयं देवदत्त इ
त्यत्र तत्तेदंतोपलक्षिततत्स्वरूपमात्रविषयत्वेन तस्य ज्ञानलक्षणाया अनुदाहरणत्वात् तत्तादिवैशिष्ट्यवि
षयत्वेपि तत्तांशे ज्ञानस्य संस्कारमात्रजन्यत्वेन स्मृतित्वात्। अत एव यस्मिन् काष्ठखंडे सौरभं पूर्वं गृ
हीतं तस्मिन्नेव सुरभिचंदनमिति व्याप्तिप्रतिसंधानेन विना जायमानं ज्ञानं स्मृतिरूपमेव स्मृतित्वानुव्यवसा
यात्। तत्रापि पदजन्यपदार्थस्मृतेरभ्युपगतत्वात्। न चैवं प्रत्यक्षत्वस्मृतित्वयोरेकत्र वृत्तौ जातिसांकर्य
प्रमात्वायं मिदं रजतमित्यादौ भ्रमस्थले प्रमात्वाप्रमात्वयोरिवावच्छेदकभेदेनैकत्र वृत्तौ बाधकाभावात्। ननु प्रमात्वा
प्रमात्वयो रूपाधिरूपत्वाद्व्याप्यवृत्तित्वं युज्यते। स्मृतित्वानुभवत्वजात्योरव्याप्यवृत्तित्वं कथं
इति चेत्। जातेरव्याप्यवृत्तित्वे बाधकाभावात्। जातिसांकर्यस्य दूषणत्वे चेवाहत्वप्रमात्वाप्र
मात्वयोरवच्छिन्नावच्छेदेन जातित्वस्यापि वृत्तौ बाधकाभावाच्च। चैतन्यातिरिक्तजातेर्निरस्त
त्वाच्च। न च कारणसंबन्धो दोषएव प्रत्यासत्तिरिति वाच्यं तस्य देशांतरविषयासंबंधेनानयसंबं

अद्वै.टी धानावत् कारणसंबद्धरागादेरपि दोषत्वाच्च। दोषस्य देशांतरस्थस्य परजतांशज्ञानाजन
५३ कत्वात्। दोषस्य प्रत्यासत्तित्वेन ज्ञानकारणत्वेऽस्माकं नो हानिः सामान्यसामग्रीमूलकत्वेन ज्ञप्रामाण्यस्य
ज्ञानसामान्यसामग्र्यतिरिक्तसामग्रीजन्यत्वरूपपरतस्त्वहानापत्तेश्च ननु सविषयकघटज्ञानवि
षयके मनसानुव्यवसाये जनयितव्ये ज्ञानेन समं संयुक्तसमवायेन संबंधस्य मनसोऽव्यवसायविष
ये घटादावव्यवसाय एव प्रत्यासत्तिर्वक्तव्या संयुक्तसमवायेन मनःसंबंधज्ञानस्य घटेनापि सत्त्वविषय
३३ विषयिभावेन लक्षणसंबंधसद्भावेन विषयकरणोन्नयसंबंधित्वात् ज्ञानं प्रत्यासत्तिर्न वाच्येति चेत्॥
न ज्ञानस्य प्रत्यासत्तित्वं स्वीकुर्वता यत्र चंदनखंडे सौरभं विशिष्य पूर्वं गृहीतं तत्रैव ज्ञानप्रत्यासत्त्या सौ
रभं कालांतरे चक्षुरादिना भासते नान्यत्रेति वाच्यं। पूर्वमदृष्टसौरभे सुरभिकाष्ठविशेषे सौरभस्य ५३
रत्वेऽस्य पीतं सुरभीत्य प्रतीतेः तथा च घटज्ञानेऽनुव्यवसायात्पूर्वं घटवैशिष्ट्यस्याननुभूतत्वात्तद्
धर्मवैशिष्ट्यं ज्ञानप्रत्यासत्त्याप्यनुव्यवसाये नाभात्। एवं च पुरोवर्तिशुक्तिकायामपि रजतवैशिष्ट्यस्य
पूर्वं विशिष्य गृहीतत्वेन रजतज्ञानं प्रत्यासत्तिर्नवेदपि त्वत्पक्षेऽप्रयोजकैव। किंच ज्ञानविषय
कानुव्यवसायोत्पत्तौ सामग्र्यपेक्षावेन स एव दुर्लभः तद्विषये व्यवसाये विषयवैशिष्ट्यं नावगाह्यमिति ज्ञा ना
नलक्षणप्रत्यासत्त्यापेक्षायां। तस्माद्धि ज्ञानमात्रं तावदात्ममनःसंयोगजन्यमिति प्रसाय विषयकानुव्यवसाय ३३
प्रसा
तवसंप्रतिपन्नं तथा च यस्मादेव आत्ममनःसंयोगाद्व्यवसायरूपं ज्ञानमुत्पन्नं तस्मादेवव्यवं

जनिः मनःसंयोगांतरादिति नाद्यः अनुव्यवसायधाराऽविरामप्रसंगो विषयांतराप्रवेशो ध्रुवस्यात्॥
तत्तदनुव्यवसायसामग्रीरूपमनःसंयोगस्याविकलत्वात्। न चादृष्टाभावात्तदभावः। दृष्टसामग्र्यां स
त्यां अदृष्टाभावेन कार्यविलंबस्य अदृष्टत्वात्। अन्यथा द्यपि योग्यानुपलंभानिश्चयेन अभावनिश्च
याभावप्रसंगात्। न द्वितीयः अनुव्यवसायरूपप्रत्यक्षोत्पत्तिसमये विषयीभूतव्यवसायस्य अभावे
नाप्रदनुदयापत्तेः अर्थस्य अन्वयव्यतिरेकाभ्यां प्रत्यक्षोत्पत्तौ हेतुत्वावगमात्। ननु विनश्यदवस्थात्म
मनःसंयोगादुत्पन्ने व्यवसाये सति तस्य द्वितीयक्षणे मनःसंयोगांतरेणाभवितव्यं। एवं हि मनसः सं
योगांतरोत्पत्तौ क्रियाप्रथमक्षणेऽदृष्टवशात्। मनसः क्रियायामुत्पन्नायां द्वितीयक्षणे विभागः तृती
यक्षणे पूर्वसंयोगनाशं चतुर्थक्षणे उत्तरसंयोगोत्पत्तिश्च। तथा च पूर्वमनःसंयोगस्य विनश्यदवस्थ म
क्षणरूपमनोविभागक्षणवर्ति विनश्यदवस्थमनःसंयोगाद्व्यवसायस्तदुत्पद्यते व्यवसायाव्यवहि
तद्वितीयक्षणोत्पन्नात्ममनःसंयोगात्तद्विषयं विषयीकुर्वतोत्पन्नेनानुव्यवसायेन विनश्यदव
स्थो व्यवसायो विषयीक्रियते। एवं सति व्यवसायविषयकप्रत्यक्षानुव्यवसायरूपं प्रत्यक्षेन विनश्य रुध्य
प्र इति चेत् न विनिश्यदवस्थस्य प्रत्यक्षतायोग्यत्वात्। अन्यथा घटादिप्रत्यक्षाव्यवहितोत्तरक्षणे विनश्य
दवस्थोऽविनश्यदवस्थो वा घटो मयानाश्यनाशकयोर्ज्ञानयोर्विषयविषयिभावायोगाच्चक्षुरिति

अद्वै॰ सि॰ संदेहेन निःशंकघटेऽपि न प्रवर्त्तेत किंच अनुव्यवसीयमानज्ञानं विनश्यदवस्थायां तस्य मनःसं
५४ योगाज्जायते विनश्यदवस्थमेव वानुव्यवसीयते इति नियमे प्रमाणाभावः अपि च एवमपि व्यवसायस्य
विनश्यदवस्थायां व्यवसायत्वनिर्विकल्पकमेव स्यात् । सम्मते विशिष्टज्ञानस्य विशेषणज्ञानजन्यत्व
नियमात् उत्तरकाले च व्यवसायत्वनिर्विकल्पकजनकमनःसंयोगातिरिक्तविशिष्टज्ञानजनकमनः
संयोगांतरोत्पत्तिसमये व्यवसायस्य चिरध्वस्तत्वेन कस्यानुव्यवसायः स्यात् तस्मात् अनुव्यवसायानु
३४ रोधेनापि ज्ञानं प्रत्यासत्तिर्न संभवतीति सिद्धमन्यथाख्यातौ सामग्र्याभाव इति किंच यत्र एतावच्छे
दकवैशिष्ट्यं प्रकारकं ज्ञानमवगाहते तत्रैव पुरुषस्य प्रवृत्तिरिति सत्यरजतज्ञानजन्यप्रवृत्तौ
दृष्टं तथापि च भ्रमस्थलेऽपि तथैव वक्तव्यं । न च तत्संभवति पुरोवर्तिनि रजतत्वावच्छेदकत्वेनावगा ५४
हनात् । तस्मात् भ्रमस्थले पुरोवर्तिनि प्रवृत्तिर्न स्यात् दृष्टतावच्छेदकरजतत्ववैशिष्ट्यस्य देशांत
रीयरजत एवावगाहनात् न च पुरोवर्तिनि रजतत्वारोपान्नायं दोष इति वाच्यं । रजतमिति स्मृत्यो
पस्थितिप्रधानीभूतरजतं विहायोपसर्जनीभूतरजतत्वस्यैवारोपे । प्रमाणाभावात् । प्रत्युत स्वतंत्रो
पस्थितस्य रजतस्यैवारोपार्हत्वात् इति किंच अन्यथाख्यातौ प्रमाणमपि निरूपयितुं न शक्य
ते । तथाहि अन्यस्य शुक्तिकादेर्देशांतरीयरजतात्मना नानात्मतेऽन्यथाख्यातिः सा चैवं सति ३४
त

अज्ञानस्य संस्कारधर्मिणां समानविषयत्वाद्यर्थभ्रमेऽनुभूयमानरजतस्य अन्यत्र सत्त्वमावश्यकं पूर्वानुभव

सि॰ द्धेत् यदि पुरोवर्तिनि भ्रमे भासमानस्य रजतस्यान्यत्र सत्त्वे प्रमाणं भवेत् न च तत्संभवति ननु पू
र्वानुभवं तत्संस्कारयोः पुरोवर्तिशुक्तिशकलविषयकत्वस्य बाधितत्वात् मेयं समानप्रकारकादपि
पूर्वानुभवादेः भ्रमोत्पत्तिसंभवेन व्याप्तिज्ञानसमानप्रकारकानुमितेरिव पूर्वानुभवे समानविषयत्व
स्यानपेक्षणात् । अपेक्षणेऽपि परमते सामान्यलक्षणया पूर्वानुभवे नैव पुरोवर्त्यनिर्वचनीयविषया
त् ननु नेह रजतमस्तीति बाधस्यानुपपत्तिरेव रजतस्यान्यत्र सत्त्वे मानं न हि देशांतरे कालांतरे वा स
तो रजतस्यैतद्देशकालयोरत्यंताभावप्रतियोगित्वं संभवति । सर्वथाऽसतः शशशृंगस्य तुच्छस्यात्यं
ताभावायोगात् इति चेत् न पुरोवर्त्तिदेश एव सत्त्वासत्त्वाभ्यामनिर्वचनीयस्यानादृत्तसंविन्नात्
दपरोक्षव्यवहारयोग्यस्य नास्तीति प्रतिज्ञासमानात्यंताभावप्रतियोगित्वयोग्यस्य लक्षणप्रमाण
स्यासाधयिष्यमाणत्वात् । किंच रजतस्यान्यत्र सत्त्वेन तद्दर्शने यथाख्यातिसंभवेऽपि पुरोवर्तिनि
रूपितस्थलवैशिष्ट्यस्यान्यत्रासत्त्वात् तद्दर्शनेऽन्यथाख्यातिर्न संभवति । तस्मात् सामग्र्याभावात् अन्य
थाख्यातिरूपमिथ्याज्ञानासंभवात् तद्विषयत्वरूपमनिर्वचनीयत्वं न संभवति । ननु रू
पजन्यज्ञानविषयत्वमेवानिर्वचनीयत्वमिति चेत् । न अजन्यसामान्यायामविद्यायामव्याप्तेः
शुक्तिरजतादेः केवलसाक्षिभास्यत्वमतेऽसंभवश्च । न च रूप्यजन्यज्ञानविषयत्वमनिर्वचनं

यरजतावभासनात् भ्रमे भासमानस्य देशांतरेऽसत्त्वेऽपि पूर्वानुभवादीनां समानविषयत्वान

स्वतः

अद्वै॰ सि॰ ५५ यद्वा । आत्मा एव वादे प्रमाया अपि गुणाजन्यत्वस्वीकारेण तद्विषये सत्त्वेऽतिव्याप्तेः नापि मिथ्या
त्वमेवानिर्वचनीयत्वं मिथ्यानिर्वचनीयशब्दयोः पर्यायत्वात् । तदर्थस्यैव विचार्यमाणत्वात् ।
नन्वेकावच्छेदेनैव स्वात्यन्ताभावसमानकालीनत्वं तदिति चेत् । न अत्यन्ताभावप्रतियोगिनोरेकदेशका
लावच्छेदेन वृत्त्यसंभवात् नापि ज्ञाननिवर्त्यत्वं तत् । ईश्वरज्ञाननिवर्त्यप्रपंचेऽप्यतिव्याप्तेः न
चोपनिषद्ज्ञानाविष्टापत्तिः सर्वसंप्रतिपन्नस्यैव मिथ्यात्वस्य संप्रति विचार्यमाणत्वात् । ना
पि सदसद्विलक्षणत्वं तेनातिव्याप्तेः । असद्विलक्षणत्वे चेन ब्रह्मण्यतिव्याप्तेश्च न द्वितीयः सदस
त्त्वरूपस्य वस्तुनो विरोधेनाप्रसिद्धेः सत्त्वात्यन्ताभावयोगित्वे लक्षणे स्यान्निर्वचनात् । नापि सद्विलक्ष
णे सत्यसद्विलक्षणत्वं तत् । सत्त्वासत्त्वयोरिव तद्वैलक्षण्ययोरप्येकत्र वृत्त्यसंभवात् । तयोः ५५
परस्परविरहाव्याप्तत्वात् तस्मान्नानिर्वचनीयस्य लक्षणं संभवति । नापि तस्य सामग्र्यस्तित्वे ध
प्रादेस्तत्कारणस्य निरस्तत्वात् । अन्यस्य चासंभाव्यत्वात् नाप्यनिर्वचनीयसाधकं प्रमाणं
मस्ति दृश्यत्वादिलिंगकानुमानस्य दृष्टान्ताभावेन हेतोर्व्याप्यत्वासिद्धेः न च परोक्षप्रतीतिबा
धयोरन्यथानुपपत्त्याऽसद्विलक्षणत्वं बाधानुपपत्त्या च सद्वैलक्षण्यमिति ख्यातिबाधान्यथानु
पपत्तिरिव तत्प्रमाणमिति वाच्यं असतः ख्यातिबाधयोरयोगेऽपि सदसत्त्वसंभवतीति प्रतीति

८ तं तत् तत्किं प्रत्येकविलक्षणत्वं लक्षणं मिलितोभयविलक्षणत्वं वा नाद्यः तुच्छस्यापि सद्विलक्षण ८

बाधयोरयोगात् अत्रासत्पदादसत्त्वप्रतीतेर्न भवतीत्यनेन तस्यैव बाधप्रतीतेः असतोऽपरो
क्षत्वानं नेति चेत्तर्हि सत्त्वं नापरोक्षमितिमानसापरोक्षव्याप्तिग्रहे व्याप्तिप्रतियोगितयाऽसतोऽपि
अपरोक्षत्वात् । यस्तत्र बाध्यत्वहेतुत्वं तत्रापि सत्ताजातियोगित्वं असद्वैलक्षण्यं वा । नाद्यः सत्ताजाति
योगिनोऽपि प्रपंचस्य तन्मते बाध्यमानत्वात् । अत एव नान्त्यः अतो निर्वचनीये लक्षणसाधनप्रमाण
णाभावादनिर्वचनीयो विषयदृष्टिः प्रपंचदृत्त्वसंगतमिति । मैवं त्रितयस्यापि सुनिरूपत्वात् । तथाहि ल
क्षणं तावत् अयोग्याश्रयवृत्तित्वं कार्यत्वे षाट्कारणं लक्षणत्वेन संसिद्धेः प्रमाणसंभवः कुतः यदुक्तं
लक्षणादेरसंभव इति तदयुक्तं । साधिकरणत्वायोग्याधिकरणकत्वस्यैव साधनाद्यनिर्वचनीयसा
धारणलक्षणत्वात् । कार्यत्वेनिर्वचनीये दोषादेः कारणत्वात् सिद्धेश्च लक्षणकारणवत्त्वे निर्वचनी
यस्य न प्रमाणस्य दौर्लभ्यं । लक्षणादिमत्त्वव्यापकत्वात् प्रमाणवत्त्वस्य ननु शुक्तिरजतादेः
स्वाधिकारणत्वायोग्यमधिकारणं उच्यते यद्रजतकालेऽपि तत्संतान्नाववत् ननु रजतकाले त
दधिकरणे तद्ध्वंसतान्नावस्य चेत्किं मानं उच्यते अस्तिता वशुक्तिकादौ रजतप्रत्यक्षानंतरजाविका
लप्रस्तत्वादिदर्शनानंतरमिदं रजतमिह काले त्रयेऽपि नास्तीति प्रतीतिः सा च प्रतीतिर्बाधिकाभावात्तद्या
र्थविषयैवेति त्रैकालिको रजताभावोऽस्ति परमार्थः अतो रजतकाले तदभावो नापह्नोतुं शक्यः ननु रज

अद्वै.टी.
५६

मव
तकाले रजतावगाहमानाप्रतीतिः कथं न बाध्यते। उच्यते। समानसत्ताकयोरेव भावाभावयोर्विरो
धेन विषमसत्ताकरजततदभावावगाहिनोः प्रत्यययोरविरोधात्। ननु कथं तयोर्विषमसत्ताकत्वं
उच्यते। त्रिविधं तावत्सत्त्वं। पारमार्थिकं। व्यावहारिकं। प्रातीतिकं चेति। तत्र पारमार्थिकं सत्त्वं ब्रह्मणः
तत्र सत्त्वस्य कदापि केनापि प्रमाणेनाबाध्यत्वात्। वियदादेस्तु सत्त्वं व्यावहारिकं प्रतीतिकालादन्यका
लेपि अनुवृत्तबाधायोग्यत्वात्। प्रातीतिकं तु शुक्तिरजतादेः सत्त्वं प्रतीतिकालादन्यकालेनुवृत्तबाधायोग्यत्वात्
अनुवृत्तबाधायोग्यत्वं च विद्यमानत्वात्। अविद्यमानत्वं च शुक्तिहेतोर्दोषादेरभावात् निमित्तस्य दोषा
देः शुक्तिहेतुत्वं हि यादि शुक्तिहेतुत्वे तालुबुद्धिवदुपपन्नं। तथा च रजतसत्तायाः प्रातीतिकत्वात्तदभा ५६
वसत्तायाश्चाबाधेनात्यन्तिकत्वसिद्धं विषमसत्ताकत्वं रजततदभावयोरिति सिद्धं स्वाधिकरण
त्वायोग्याधिकरणकत्वरूपमनिर्वचनीयलक्षणं। ननु शुक्तिरजततदभावयोर्विषमसत्ताकत्वे
नाविरोधे घटादावप्यविरोधः तयोः स्यात्। न चैतद्युज्यते। नियमेन शुक्तिरजतस्य घटादावनुप
लंभादिति चेत्। न एकस्यापि कपिसंयोगाभावस्य वृक्षावच्छेदेनाव्याप्यवृत्तित्वेपि घटाद्यवच्छेदेन
यथाव्याप्यवृत्तित्वकल्पना। तथाधिष्ठानावच्छेदेन रजततदभावयोरविरोधेपि तदन्यावच्छेदेनप्र
तीतिबलेन विरोधसत्त्वेकानुपपत्तिः इति ननु लाघवात् भावाभावत्वमेव विरोधितावच्छेदकमस्तु

ननु समानसत्ताकत्वविशेषितमपि गौरवात्। मैवं। अनन्यथासिद्धप्रतीतिद्वयानुसारेणैकदेशे क्व
रजततदभावाभ्युपगमावश्यंभावेन समानसत्ताकत्वस्यैव विरोधितावच्छेदकत्वकल्पनात्। प्रामा
णिकत्वेन गौरवस्यादूषकत्वात्। अथ वा यद्रजताभावरूपं रजताधिकरणं तदेव स्वाधिकरणत्वा
योग्यमधिकरणं रजतादेः। न त्विदं रजतमिति रजतसंबंधितया प्रतीयमानस्याधिष्ठानस्य कथं
रजताभावरूपत्वं। घटाधिकरणभूतलादेस्तद्धटाभावरूपत्वादर्शनात्। उच्यते। कल्पितरज
ताधिष्ठानं नाम तदुपादानीभूताज्ञानाश्रयविषयं शुक्तिकावच्छिन्नं चैतन्यमेव। तत्र च कालत्रयेरजतं
नास्तीति प्रतीत्या पारमार्थिको रजताभावः सिद्ध इत्युक्तं। स चाभावोधिष्ठानाद्भिन्नो नवि तुं नाहत्ति पारमा
र्थिकपदार्थद्वयस्याद्वैतश्रुतिविरोधेनानभ्युपगमात्। न च भावाद्वैतपरा श्रुतिरिति वाच्यं संकोचे मा
नाभावात्। कल्पितरजतघटितस्य तदभावस्य (रूपा) अधिष्ठानाद्भेदे कालत्रयेरजतं नास्तीति प्रतीतिसिद्ध
पारमार्थिकत्वासंभवाच्च। नन्वधिष्ठानस्याभावस्यापि कल्पितैरजताभावस्य प्रतियोगिसमानस
त्ताकत्वेपि सत्यज्ञानादिरूपेण प्रमाणेनासिद्धाधिष्ठानचैतन्यरूपेण तन्मायेनासिद्धस्य कल्पितर
जतप्रतियोगिकाभावस्य पारमार्थिकत्वे बाधकाभावात्। यथा घटाभावाभावात्मकस्य घटस्या
भावात्मकत्वेपि प्रमाणप्रतिपन्नं भावात्मकत्वं न विहन्यते। तथाधिष्ठानस्य कल्पिताभावरूपत्वेपि प्रमा

✓घटितत्वेन अपारमार्थिकत्वं केन वारणीयमिति चेत् उच्यते। विरहैकस्वभावकल्पित✓

हध्य व

अद्वै॰ टी॰ णमिथ्यात्वं पारमार्थिकत्वं न विरुध्यते। ननु पुरोवर्त्तिनि रजतं नास्तीत्यधिष्ठानाधारतया प्रतीयमानस्य र
जतात्यन्ताभावस्य कथं तदात्मकत्वं आधाराधेययोर्भेदनियमात्। कथं वा रजतस्यात्यन्ताभावरूपस्यात्यन्ताभावरूपमधि
५७ ष्ठानमत्यन्ताभावात्यन्ताभावस्य विरहैकस्वभावत्वाभावप्रसङ्गात्। इति चेत्। उच्यते। प्रतियोगिसमानसत्ताका
त्यन्ताभावस्याधिकरणाभेदे प्रतियोगिविषमसत्ताकस्य तस्याधिकरणाभेदे किं बाधकं। भावरूपप्रतियोगिस
मानसत्ताकात्यन्ताभावस्य विरहैकस्वभावत्वेऽपि तद्विषमसत्ताकात्यन्ताभावस्य भावरूपत्वे वा किं बाधकं ननु अत्य
न्ताभावमात्रस्याधिकरणाभेदप्रयोजकत्वे भावरूपप्रतियोगिकाभावस्य विरहैकस्वभावत्वप्रयोजकत्वे
वाच्ये प्रतियोगिसमानसत्ताकत्वविशेषणोपादाने गौरवमिति चेत्। न कल्पितरजतात्यन्ताभावस्य प्र
मुभवबलात् त्रैकालिकस्याबाधात् पारमार्थिकस्योक्तयुक्त्याधिष्ठानाभेदकल्पनायोगेनाधिकर ५७
णरूपत्वेनाभावरूपत्वे च सिद्धे गौरवे सत्यपि प्रतियोगिसमानसत्ताकत्वविशेषणस्यावश्य
कत्वात्। एवं च सिद्धे रजतादेरनिर्वचनीयत्वलक्षणलक्षितत्वे तद्दृष्टान्तेन वियदादिप्रपंचस्यापि प्र
निर्वचनीयत्वे सिद्धे तदत्यन्ताभावोऽपि तदधिष्ठानरूपं ब्रह्मैवेति सिद्धं कल्पितप्रतियोगिकाभाव
स्याधिकरणरूपत्वं। नैवात्र विवदितव्यं। प्रपंचोपशमः शिवमद्वैतमित्यादिश्रुत्या प्रपंचात्यन्ताभावस्य ब्रह्मस्वरू
पताबोधनात्। तस्मात् स्वाधिकरणात्यन्ताभावाधिकरणकत्वमनिर्वचनीयत्वमिति लक्षणं सिद्धं ३७

५ घटप्रतियोगिकाभावस्य आधारातिरिक्तस्यानंगीकारेण तयोराधाराधेयभावाभावात् तर्हि घटे ५

ननु शुक्तिरजतादेरधिष्ठानस्य तदत्यन्ताभावरूपत्वेऽपि कथं रजताधिकरणत्वायोग्यत्वं। उच्यते।
स्वात्यन्ताभाववतः स्वाधिकरणत्वायोग्यत्वं च स्वात्यन्ताभावस्यापि स्वाधिकरणत्वायोग्यत्वात्
घटात्यन्ताभावे घटानाधारत्वस्य नियमेन क्लृप्तत्वात्। न चैवं घटात्यन्ताभावात्यन्ताभावरूपे घटात्यन्ताभा
वोऽस्तीति प्रतीतिर्न स्यात्। इति वाच्यं। इष्टापत्तेः। अधिकरणभिन्नसत्ताकप्रतियोगिकाभावस्यैवाधिकर
णाद्भिन्नत्वे न घटे घटो नास्तीति प्रतीतेः कालातिरिक्तत्वे तदनभ्युपगमे यथा घटो घटात्यन्ताभावात्यन्ताभावोऽनन्य
इति प्रतीतिरनवस्थानयेनान्योन्याभावप्रतियोगिकमन्योन्याभावं घटनिष्ठमविषयीकुर्वाणापि
घटरूपेण विषयेण सविषयान्नवरुद्धा।। तथा घटे घटो नास्तीति प्रतीतिरप्रसिद्धदोषः।। तस्मात् स्वात्यं यं
ताभावस्य स्वाधिकरणत्वायोग्यत्वात् कल्पितरजतात्यन्ताभावस्याधिष्ठानरूपस्य स्वप्रतियोगिरजता
धिकरणत्वायोग्यत्वमिति। ननु स्वाधिकरणत्वायोग्यत्वे तदधिकरणत्वयोर्विरोधादसंसर्गित्वं लक्षणं
स्व इति चेत्। न अयोग्यत्वस्याधिष्ठानेऽनुपादनतिरिक्तस्य पारमार्थिकत्वेन तस्य कल्पितरजताधिकरणत्वे
न सममविरोधाभावात्। समानसत्ताकयोरेव विरोधात्। दोषत्वेन दोषजन्यत्वं कार्याध्यासस्य लक्षणं।
न च दोषस्य रजतादिज्ञानं प्रत्येव कारणत्वं न रजतादिकं प्रतीति वाच्यं। रजतादिज्ञानस्य साक्षिरूपतयाऽजन्य
त्वेन कारणानपेक्षत्वात्। दोषस्यार्थं प्रत्येव कारणत्वावधारणात्। दोषसाक्षात्कारस्यापि दोषजन्यत्वे

अद्वै॰ दी॰ नातिव्याप्तिपरिहारायदोषत्वेनेत्युक्तं। संप्रयोगसहकृतसंस्कारजन्यत्वंवाकार्याध्यासस्यलक्षणं। संप्र
५८ योगोनामाधिष्ठानसामान्यज्ञानं। अधिष्ठानंनामभ्रमविषयोपादानीभूताज्ञानाश्रयविषयरूपंचैतन्यं
तस्यसामान्यज्ञानंनामभ्रमाविरोधिस्फुरणंइतिनांतःकरणाद्यध्यासेव्याप्तिः। भ्रमाविरोधिसाक्षिस्फुर
णस्यान्तःकरणाद्यध्यासाव्यवहितपूर्वक्षणेपिसत्वात्। स्मृतावतिव्याप्तिपरिहारार्थंसंप्रयोगसह
कृतेतिपदं। अधिष्ठानस्फुरणजन्यभ्रमव्यवहारेऽतिव्याप्तिवारणायसंस्कारेतिपदं। नाप्यकारीयंस्मृति
३९ रूपःपरत्रपूर्वदृष्टावभासइत्यध्यासलक्षणं। उक्तलक्षणत्रयपरतयाव्याख्यातत्वाद्व्याख्यातं। तत्र
आर्थिकंपरपदमध्याहृत्यपरत्रपरावभासइत्येकं अध्यासमात्रलक्षणं तत्तात्तस्यस्वाधिक
रणत्वायोग्याधिकरणकत्वरूपमर्थमाहुः इदंतुव्याख्यातमधस्तात्। स्मृतिरूपपदेनदोषसंस्कार ५८
प्रयोगजन्यत्वेलक्षणंविलाइदंकार्याध्यासस्यस्वरूपंनतुलक्षणमित्याहुः लक्षणत्वेसंस्कारादि
विशेषणद्वयस्यव्यर्थतापातात्। एत[blot]त्कार्याध्यासस्वरूपबलादेवउक्तंकार्याध्यासलक्षणद्वयं
सिद्धं अथवामिथ्यात्वमेवलक्ष्यलक्षणमस्तु तच्च एकावच्छेदेनस्वसंसृज्यमानाधिकरणनिष्ठात्यंता ३९
भावप्रतियोगित्वमिति। नचैकावच्छेदेनैकस्मिन्कालेभावाभावयोर्व्यवस्थितिर्नसंभवतीतिवाच्यं २८
विषमसत्ताकयोस्तयोरविरोधस्योक्तत्वात्। अथवासदन्यत्वमेवमिथ्यात्वमस्तु। नचाद्वैतहानिव्याप्तिः
स॰

धिकरणत्वायोग्यः यथाघटाभावोघटस्य हेतुद्वयंचसाधितंतथाचस्वाधिकरणत्वायोग्य।

तुच्छस्यसदन्यत्वादिधर्मायोगात्धर्मवत्वेवाअसदितिनाममात्रत्वापातात्एवंचसिद्धमनिर्वचनीयार्थाध्यास
स्यलक्षणं अनिर्वचनीयार्थविषयकज्ञानत्वंचज्ञानाध्यासलक्षणं। तच्चबुद्धिविध्वंसादिरूपं। अविद्या
वृत्तिरूपंचेतिसिद्धंचलक्षणेतत्लक्षणसिद्धयेचदोषादिजन्यत्वमन्वयव्यतिरेकादिनानिर्वचनीयस्य
कार्यस्यसाक्षिकमेव। प्रमाणंचसदन्यत्वरूपेऽनिर्वचनीयत्वेसद्रजतमिति प्रसक्तमेव तथाहिब्रह्मणः
सद्रूपत्वनिरूपणेसत्वंनघटादिप्रपंचस्यस्वरूपंनवाधर्मइतिसाधितं तथाचसद्रजतमितिसामाना
धिकरण्यप्रतीतसंबंधापेक्षायांसद्रजतयोस्तादात्म्यसंबंधएववक्तव्यःप्रसिद्धसंबंधांतरस्यात्रासंभवा
त्। सचतादात्म्यसंबंधोभिन्नत्वेसत्यभिन्नसत्ताकत्वरूपोभेदगर्भितएवेतिसिद्धंसदन्यत्वंरजतादेः
किंचअनुमानमपिशुक्तिरजताधिष्ठानेतदधिकरणत्वायोग्यंसर्वदातदत्यंताभावाधिकरणत्वात्।
यत्सर्वदायदत्यंताभावाधिकरणंतत्तदधिकरणत्वायोग्यंयथावह्निःशैत्यस्य। यद्वातदत्यंताभाव
रूपत्वादितिहेतुः योयदत्यंताभावरूपःसतदधिकरणकत्वंरजतादेरर्थात्सिद्धं। अपरोक्षभ्रांति
त्वप्रसिद्धिरपिअर्थस्यमिथ्यात्वेप्रमाणंख्यात्यंतरस्यनिराकृतत्वात्मिथ्यार्थविषयंविनाभ्रां
तित्वानुपपत्तेः ख्यातिबाधान्यथानुपपत्तिरपितत्रप्रमाणं इदमसन्नभवतीतिशब्दात्तःप्रतीति
बाधोक्तकाचित्तिचेत्। नअसदादिशब्दादुत्पन्नःज्ञानस्यनिर्विषयकविकल्पमात्रत्वात्। अतएवभाष्ये

अद्वै. सि. ज्ञानानुपातीवस्तुशून्योविकल्पइतिवदंति। केवलोऽसत्त्वशब्दज्ञानाज्ज्ञायमानोऽतःकरणवृत्तेर्निर्विषयता
याःसर्वैःस्वीक्रियमाणत्वाच्च। यत्तुयदसत्तन्नापरोक्षमितिव्याप्तेर्मानसापरोक्षत्वेनतत्प्रतियोगिनो
५८ ऽसत्पदार्थस्यापिसत्त्वमितितन्न। असत्प्रतियोगिकव्याप्तेरपितुच्छत्वेनतत्र इंद्रियसंप्रयोगजन्यज्ञा
नविषयत्वस्य। अनावृत्तसंविदात्मकत्वस्यचासत्त्वेनापरोक्षत्वायोग्यत्वात् यदप्युक्तंसत्त्वंजातिर्वा।
द्व५ असद्वैलक्षण्यंवेत्यादि। तदपिनपदार्थत्वबहिर्भूतस्यबाधायोग्यस्वरूपत्वस्यबाधात्वव्याप्तस्य
सत्त्वशब्दार्थत्वात्। यच्चोक्तंसत्त्वासत्त्वप्रतियोगिकंवैलक्षण्यद्वयमेकत्रनसंभवतिविरोधादिति त
दपिनयुक्तंसिद्धवैलक्षण्यद्वयस्याप्रकृतत्वायोगात्। यथावैशेषिकादीनांघटात्यंताभावेघटवत्त्वैल
व६ क्षण्यंघटात्यंताभाववैलक्षण्यंचान्यत्रासमानाधिकरणेऽप्यवतिष्ठतःतथानिर्वचनीयपदार्थेसत्त्वास
त्त्ववैलक्षण्येऽपितिष्ठतःकोदोषः। ननुघटात्यंताभावोप्यभेदसंबंधेनघटाभाववान्भवत्येवेति
३५ नतत्रघटाभाववद्वैलक्षण्यमितिचेत्। नअभेदसंबंधस्यपूर्वंनिरस्तत्वात्। किंचअसत्त्वस्तुच्छ ५८
स्यसतोवापरमात्मनःउत्पत्तिविनाशयोरदर्शनात्। उत्पत्तिविनाशवत्त्वमप्यनिर्वचनीयत्वेप्रमाण
मित्युक्तं। एवंचलक्षणसाधनप्रमाणैःसिद्धशुक्तिरजतादिरूपेनिर्वचनीयपदार्थेतद्दृष्टांतेन
दृश्यत्वजडत्वादिलिंगैःसर्वस्यापिचिद्भिन्नस्यतथात्वंसिद्धमितियुक्तंउक्तं। अनिर्वचनीयवियत्
३५

९०
द्यवस्थांतरात्मनाविवर्त्ततइति। सद्भिर्निरूपितंलक्षमात्मशुद्धिप्रसिद्धये। उक्तंनुचेत्ग्रंथदोषः
न्यम्यतांकरुणात्मभिः। अनिर्वचनीयद्वैतप्रपंचस्वीकारेसद्भूनशास्त्रोक्ताद्वितीयब्रह्महानिमुक्त्वानुवा
दपूर्वकंशंकतेनन्विति। अनिर्वचनीयमविद्यमानमितिनाशंकनीयमित्याह। प्रतीतिसिद्धेति। अ
परोक्षप्रतीतिचेत्सिद्धमित्यर्थः। ननुज्ञानात्समूलप्रपंचनिवृत्तौअद्वैतसिद्धिर्भविष्यतिद्वत्याशंक्य
हर५ परिहरतिनचेत्यादिना। दृशाविशेषइति। नाचेष्टापत्तिःश्रुतौतदप्रतीतिंसुलक्षणमेवेत्यवकारेण
ध्येः तद्विपरीतस्यैवोपलब्धेः। अद्वैतश्रुतिर्हिब्रह्मणोद्वैताभावंत्रैकालिकंबोधयतितच्चानिर्वचनीयल
क्षणार्थपर्यालोचनयानबाधितमित्याहनेत्यादिना। आवश्यकत्वेनेतिस्वसंसृज्यमानाधिकरण
निष्ठात्यंताभावप्रतियोगित्वस्यतल्लक्षणत्वादितिभावः। प्रकारांतरेणापिद्वैतप्रपंचेनाद्वैताविरोध
माहकिंचेति। द्वैतस्यसत्स्फुरणात्मकत्वेघटःसन्नित्यादिहेतुगर्भविशेषणंआदिपदेनघटःस्फुर
तीतिप्रत्ययपरिग्रहः। द्वैतस्यसदाध्यात्मतयाप्रतीयमानत्वेपिकथंब्रह्मरूपत्वंइत्यतआहसदा
त्मकेति। घटःसन्नित्यादिवाक्येसत्स्फुरणपदार्थयोरुक्तंब्रह्मरूपत्वमंगीकरोतिसत्यमिति। अ
नंगीकृतमंशमाहनामरूपेति। उक्तंतावत्तच्चैवमसद्घटशब्देनपर्यायोतदर्थयोश्चाभेदघटित
त्वाद्यत्प्यसंबंधोप्युक्तःतयाचसत्स्फुरणांशयोर्ब्रह्मात्मकत्वेपिनामरूपात्मकप्रपंचस्यनब्रह्मात्म

अद्वै.टी. कत्वमित्यर्थः। सदात्मकब्रह्मस्वरूपातिरेकेण नामरूपयोर्ब्रह्माद्वैततापादकस्वरूपानिरूपणान्न
६० यं दोषः। इति परिहरति निरूपयितुमिति। अवच्छेदोत्तेदः कथं न निरूपयितुं शक्यत इत्याशंक्य तद्दर्शाक्य
त्वं वक्तुं विकल्पयति ते अपीति। ते नामरूपे। अपिनाब्रह्म समुच्चिनोति। तच्च दर्शितार्थं। सदात्मतया।
अस्फुरतो र्नामरूपयोर्गगनकुसुमवत्त निस्वरूपापत्त्या नाद्वैतापादकत्वमित्याह अंत्य इति। तत्स्वरूपमि
४ ति तयोर्नामरूपयोः स्वरूपं तदवच्छेद इति तात्त्यां नामरूपाभ्यामवच्छेदः ते दः सद्रूपतया स्फुरतोस्त
योः स्वरूपं ब्रह्मैव स्वरूपमिति तेन सद्वितीयता त्यां ब्रह्मण इत्याह आद्य इति। ननु सन् घट इत्याद्य
पुनरुक्तेः शब्दयप्रयोगेण प्रमाणांतरेश्च प्रतीयमानस्य नामरूपात्मकस्य युक्त्या कथमपलाप
इत्याह नन्विति प्रतीत्यपलापो सिद्ध इत्याह। न वयमिति कथं तर्हि प्रतीयमानाभ्यां नामरूपाभ्यां न
द्वैतापत्तिरिति शंक्यते। किंचिति नामरूपयोः सत्स्फुरणात्मकब्रह्मातिरिक्तस्वरूपासिं निरूपणा ६०
न्नास्ति द्वैतापत्तिरित्याह। प्रतीतयेति। ब्रह्मैवकपस्वरूपमित्याशंक्य सत्स्फुरणात्मकत्वेनेत्युक्तं
हेतुं स्फुटयति यत इति। बुध्याविवेकेन। सत्स्फुरणाभ्यां सकाशाद्भिः लक्ष्यमाणयोः पृथक्क्रिय
माणयोरपि तयो र्नामरूपयोः सदात्मत्वेनैव स्फुरणं यतः अतो ब्रह्मैव स्वरूपमित्यनेन न
संबंधः नामरूपयोः सदात्मतया अस्फुरतो प्रतीतिसिद्ध तद्रूपापलापबोध्यमेव नावतरति। ६०
चो

अस्फुर

साह। अन्यथेति। न हि सदात्मतयोर्नो नरविषाणादेरपलापे कस्यचिद्वादिनः प्रतीतिविरोधो
स्ति। एतद्बोध्यपरिहारप्रयासोपि नास्माकं न वेदित्याह न वा इयेति। नामरूपयोः सदात्मतयाऽस्फु
रणेन तु प्रतीतिविरोधरूपपूर्वपक्षानुत्थानादिति भावः ननु सदात्मकतयाप्रतीयमानेपि घटा
द्याकारो द्वैतापत्तिमावहति सन् घट इति घटाकारप्रतीतेरर्थद्वयविषयत्वादित्याशंक्याह। एवं चेति
कोप्याकारः पारमार्थिकतयेति शेषः स्वरूपं विचार्यमाणं सदिति शेषः ब्रह्मैवेत्यत्रेति निश्चीयत इति
शेषः स्वरूपं अबाधितं रूपं नामरूपाकारस्तु बाध्यत्वात् सद्भिन्नत्वेन इति न सतो द्वैतापादक इति भा
वः। ब्रह्मातिरिक्तं द्वैतवस्तु नास्ति येन द्वैतापत्तिः स्यादित्युक्तेऽर्थे बृहदारण्यकश्रुतिप्रमाणयति श्रुतिर
पीत्यादिना श्रुतेरयमर्थः अनेन परमात्मना किंचन किंचिदपि अनावृतं अनाच्छादितं नास्ति तथा अ
नेन किंचन असंवृतं अनन्तः प्रवेशितं नास्ति ब्रह्मणः सर्वोपादानत्वादुपादाने चोपादेयस्यांतर्भावनि
यमात् ब्रह्मणि सर्वं प्रविष्टमित्यर्थः तथा चांतर्बहिर्भावेन कार्यकारणभावेन च ब्रह्मैव व्यवस्थितं न ततोन्य
त्किंचित् पारमार्थिकं रूपमस्तीत्यर्थः अस्मिन्नेवार्थे पुनः श्रुतिद्वयमुदाहरति अंतर्बहिश्चेत्यादिना
तच्च सर्वं एकं ब्रह्म तच्छ्रुतीनां तात्पर्यमाह इत्याद्येतिसर्वस्यैकरूपत्वे हेतुरूपस्येति हेतुगर्भं विशेषणं
ब्रह्मणः सर्वदृश्यात्मकत्वे रूपमिति विशेषणं हेतुगर्भं दृश्यस्य सर्वदृश्यात्वं ननु अद्वैतप्रत्यय

अद्वै॰ टी॰ रधिष्ठानचैतन्यव्यतिरेकेण स्वरूपानिरूपणाद्य्याधिष्ठानात्मकत्वं तथा प्रपंचस्येति भावः न
५९ नु अद्वैतप्रतिपादकश्रुतिवत् द्वैतार्थप्रतिपादकाः सृष्टिश्रुतयो दृश्यंते इति चेन्न तासामपि अद्वैत
तात्पर्यकत्वादित्याह। सृष्टिश्रुतिरिति। अद्वैतमेव द्रढयतीत्यनेन संबंधः द्रढीकरणं यथेहेत्युमाह
रि॰ ईदृशीमिति ब्रह्मात्मैकपारमार्थिकस्वरूपरहितमिति यावत्। सम्मतद्वृत्तिः सृष्टिः वियदादिप्रपंचः। अ
यमाशयः न तावत् ब्रह्मणो जायमानाः सृष्टिस्ततो भिन्नाभिन्ना यो घटपटयोरिव कार्यकारणभावानु
पपत्तेः अत एव नाभिन्ना भिन्नाभिन्ना च विरोधात् असंगविस्फुरणात्मतया प्रतीयमानस्य
प्रपंचस्य तद्भिन्नस्वरूपायोगात् सत्वासत्वोभयरूपत्वेनाप्यनिरूपणात् सृष्टिरनिर्वचनीयैव
स्वीकर्तव्येति। नन्वनिर्वचनीयसृष्टिप्रतिपादनेनाद्वैतद्रढीकरणं कथं श्रुतेः। अध्यारोपापवाद ५९
न्यायानुसरणेन निःप्रपंचाद्वैतब्रह्मस्वरूपस्यैव सृष्टिश्रुतिभिः प्रतिपादनात्। तथाहि अध्या
रोपो नाम वस्तुभूते परमात्मनि अवस्तुभूतस्य शुक्तिरजतादितुल्यस्य प्रपंचस्यारोपः। अ
पवादो नाम आरोपितस्य प्रपंचस्याधिष्ठाने निषेधः तथा च ब्रह्मणि प्रपंचारोपेणैतावदिदमवग
तं। प्रपंचोपादानाज्ञानाश्रयत्वात्। ब्रह्मणः प्रपंचोऽतोऽन्यत्र नास्तीति पुनस्तत्रैव श्रुत्या त्रैकालि
कनिषेधरूपेणापवादेन प्रपंचस्य वलितिस्वात्मताऽवसमानाधिकरणत्वरूपं मिथ्यात्वं सिद्ध

६१

ति तेन अधिष्ठानस्य ब्रह्मणो अद्वैतत्वं सिद्ध्यतीति तादृशप्रपंचस्याद्वैतानविघातकत्वात्। वस्तुत
स्तु अनिर्वचनीयः प्रपंचोऽपि प्रतीतिव्यतिरिक्तो नास्ति कुतस्तेन द्वैतापादनं इति सिद्धांतानेदमन्त्रि
त्याह इयमेवेति दृष्टिरेव सृष्टिः दृष्टिसृष्टिः दृष्टिव्यतिरिक्तः सत्यः प्रपंचो नास्तीत्यर्थः ननु परोक्षत्वाप
रोक्षत्वनियतसाध्यसाधनवर्णादिनेरभिन्नाः दृष्टिविषयत्वेन तत्तद्भिन्नत्वेन प्रतीयमाना अनेकेऽ
र्थाः कथं दृष्ट्यनतिरिक्ता भवितुमर्हंति। स्वप्नमनोरथाद्यर्थवत् भविष्यंतीति चेन्न तत्रापि तादृशा
व्यवहारयोग्यानिर्वचनीयार्थांगीकारात्। उच्यते निरूपय तु तावत् यान् स्वप्ने दृष्टिव्यतिरिक्तार्थांतरस स्य
द्भावं तत्किं प्रतीतिकालादन्यत्रापि तिष्ठति उत प्रतीतिकालमात्रस्थायी वा नाद्यः कदापि केनापि तदननुभवा
त्तथात्वास्वीकाराच्च। द्वितीयेऽपीदं विचारणीयं स्वप्नादौ किं तत्प्रतीतिमात्रं व्यवहारजनकं किं वा तद
रि तिरिक्तोऽर्थोऽपि। नाद्यः अर्थं स्वीकुर्वताऽपि तावत्त्वत्प्रतीतिः स्वीकर्तव्या। प्रसंगात्तार्थस्य व्यवहाराजनकत्वात्।
स्वीकृतायां च तस्यां सैव व्यवहारायालं किमर्थेन निर्विषया दृष्टिरपि न संभवतीति चेत्। न परैर
प्यतीतानागताकारनिर्विषयदृष्टिस्वीकारात् शब्दज्ञानानुपातिवस्तुशून्ये ज्ञानस्वीकाराच्च। ज्ञा
नातिरिक्तार्थाभावेऽर्थविषयकव्यवहारः कथमिति चेत्। न व्यवहारस्यापि दृष्टिव्यतिरिक्तस्याभावा
सिद्धेश्च स्वप्नादौ सर्वस्य दृष्टिमात्रत्वे जाग्रत्यपि प्रपंचस्य दृष्टिमात्रत्वमेव च। दृष्टिव्यतिरिक्ताप्यन्तावे

यागादितज्जन्यापूर्वाद्यभावेन स्वर्गादिभोगः। कथमिति चेत्। न यागादिभोगांतस्य सर्वस्य दृष्टिमा
त्रत्वात्। साध्यसाधनरूपार्थाभावे मोक्षार्थप्रवृत्तेरप्यभावात्। दृष्टिसृष्टिरूपः संसारः कदापि न निवर्त्ते
त इति चेत्। न स्वप्नप्रपंचनिवर्त्तकात् स्वाप्ने नैव मिथ्याभूतेन ज्ञानलाडनादिनाजनितात् स्वप्नप्र
पंचविपरीतार्थविषयकावबोधात् स्वप्नसंसारनिवृत्तिवत्। संसारित्वविशिष्टबोधविषयविपरी
तविषयकात् मायिकदृष्टिसृष्टिरूपश्रवणादिसाधनजनितात् ब्रह्माहमस्मीति बोधात् दृष्टिसृ
ष्टिरूपकर्तृत्वादिसंसारनिवृत्त्युपपत्तेः परं तु स्वप्ननिवर्त्तकबोधस्य स्वप्नोपादानाज्ञाननिवर्त्तकत्वा
भावात् पुनः स्वप्नांतरोत्पत्तिः ब्रह्मज्ञानस्य तु संसारोपादानाज्ञानदृष्टिनिवर्त्तकत्वात् न पुनः संसा
रोत्पाद दृष्टिः इति विशेषः। दृष्टिसृष्टिप्रतिपादकं कौशीतकब्राह्मणवाक्यं सततात्पर्यकमुदाहरति य
दा सुप्त इति इत्याद्यथेति चक्षुः सर्वैरूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः स ६२
हाप्येति। इति इत्यादिनेति। यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन्नेवमेवैतस्मादा
त्मनः प्राणा यथायतनं विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोका इति। अस्यार्थस्तु यदा यस्मिन् का
ले सुप्तः शयनमागतः स्वप्नं जाग्रद्वासनारूपं पदार्थजालेन कंचन पदार्थमपि नावलोकयति। अ
यं तदा स्वप्नावलोकनकाले अस्मिन् मुखनासिकासंचारिणीति रस्तु तज्ज्ञानशक्तौ प्राणएवक्रिया ६२

शक्तावेव न तु स्वतंत्र एकधा तत्त्वतिरेकेणं गच्छतीत्यनुत्तरता वागादीनि करणानि क्रियाशक्तिअत आह तदेति। त
दा तस्मिन् प्राणे एकधा तत्त्वनकाले तं प्राणोपाधिकमात्मानं वाक् चक्षुः श्रोत्रमनांसि स्वविषयालिं
यं गच्छंति। पर्यायश्च तु स्ये वागिस्वादिस्थं सं नु प्राणेऽप्यपीति पुनः कुतः पुनरुत्पत्तिरित्यत आह सः प्रा
णोपाधिकः पुरुषः यदा यस्मिन् काले प्रतिबुध्यते जागरणं गच्छति जागरणावसरे एतस्मादुत्प
त्तौ दृष्टांतमाह यथा दृष्टांतः अग्नेर्ज्वलतो देदीप्यमानात् विस्फुलिंगाः क्षुद्राः अग्निकणाः विप्रतिष्ठे
रन् विविधासु दिक्षु निर्गच्छंति। अनेनैव प्रकारेण न त्वन्यथा एतस्मात् प्राणोपाधिकादात्मनः श्रौतं
दात्मनः प्राणा वागादयः यथायतनं यथास्थानं जिह्वादि इंद्रियं प्रविप्रतिष्ठंते विविधं निर्गच्छंति। प्रा
णेभ्यो वागादिभ्यो देवा अग्न्यादयः विप्रतिष्ठंते इत्यनुवर्त्तते। अत्र च वक्ष्यमाणे च। देवेभ्योऽग्न्यादिभ्यो
लोकाः नामादयो विषयास्तिष्ठे। ननु प्रतिदिनं सर्वस्य दृष्टिमात्रत्वे अत्यन्तिज्ञातज्ञ सोऽर्थविषयत्व
व्यवहारस्य कथं सिद्धिरिति चेत्। तत्राह। एतावद्रूपामिति। आदिपदेनाप्ति वेदनायौ क्रियेग्रह्येते। स्वप्नो
पलब्धशरीरादेर्यथा जाग्रच्छरीराज्जेद प्रत्यभिज्ञा अर्थमत्वा केवलदृष्टिरूपा जायते तद्वज्जाग्रत्यपि
इत्यर्थः। ननु यदा सुप्त इत्यादि श्रुतिरसंभावितमर्थं कथमवबोधयेत्। इत्याशंक्यासंभावितोऽर्थश्रुतिप्र
सिद्धमित्याशयेनाह। प्रधीकालीनि। सम्यङ् निस्थादिकमनुष्ठानादिगुणातः करणस्य इत्यर्थः तु अ

द्द न

अद्वै॰ टी॰ ६३ हार्द्दूहापोहसमर्थस्य दृष्टिसृष्टिर्याथार्थ्येन संभावितो न भवतीत्यर्थः। एवकारतात्पर्यमाह नैव प
श्यतीति। अधिकारिविशेषस्यैतादृशी तत्त्वदृष्टिं प्रतिपादयति। न तथ्य कूजनसाधारणं व्याव
हारिकार्थरूपं। उत्तमाधिकारिणं दृष्टिसृष्टिन्यायविदं प्रति व्यावहारिकार्थसृष्टिप्रतिपादने
ऽपि तस्य प्रतिबाधितार्थस्यात्। तर्हि प्राकृतजनैः प्रतीयमाना दृश्यातिरिक्ता सृष्टिः पारमार्थि
की वर्त्तते किं इत्याशंक्याह। अथ कूजनानामिति तादृशपदं दृष्टातिरिक्तायां विपरीतार्थ्यासो दृश्या
तिरिक्तार्थरूपतायां ज्ञाने। उपपत्तेरिति। अतो न प्राकृतजनैः प्रतीयमाना सृष्टिः पारमार्थिकी। ए
वं विश्वस्य सत्त्वानित्यत्वादिश्लोकस्थविश्वपदोक्तस्य तत्पदार्थस्योक्तस्य ज्ञानानन्दात्मकत्वमुप ६३
पाद्य तस्य गुरुकमिति जीववाचकपदेन सामानाधिकरण्यादुक्तजीवात्मनैक्यमित्यादिभिः प्रपंचयति।
६३ एतदेवेत्यादिना। तत्त्वमस्यादिवाक्यं कर्ट्ट एतदेव पूर्वोक्तमेव सद्वादिस्वरूपं सच्चिदानंदात्मकं ब्रह्म
तत्पदार्थं त्वंपदार्थजीवात्मस्वरूपतया। त्वंपदार्थो यो जीवात्मा तस्य यत्स्वरूपं जडत्वाचिल्लदेकतया
प्रतिपादयतीति संबंधः। ननु जगत्कारणत्वविशिष्टवाचकं तत्पदं कथमनेन योग्यं सद्वादिस्वरूपमुप ६३
स्थापयेदित्यत आह लक्षणयेति सच्चिदानंदात्मकप्रत्यगात्मैक्ययोग्यं त्वंपदजन्यं स्वरूपं प्रमुत्पादयेत्तु तस्य
देहेंद्रियमनःप्राणादिकविज्ञानाहंकारेभ्यो विवेकमाह। तथाहीत्यादिना। ननु स्थूलोऽहं कृशोऽहमित्यात्मत्वस्य

ते र

देहधर्मसामानाधिकरण्यप्रतीतेरात्मत्वस्य देहधर्मत्वाद्देह एवात्मा किंच। नेतरस्त्यावद्वात्मेति सर्वत्रा
जनसिद्धं चेतनत्वं च स्थूलोऽहं चेतनत्वमिति देहधर्मसामानाधिकरण्यप्रतीतेश्चेतनस्य देहस्य व्यतिरेकाभि उ
विधानाच्च स एव जीवात्मस्वरूपमिति कथं तस्य तस्य तत्त्वात्त्वेदद्वत्यादांकायामनुमानाद्दनुमानयोर
न्यथासिद्धेरप्रयोजकत्वात् व्यभिचारवत्त्वे दग्राह प्रमाणबाधितत्वाच्च नैवमित्याह देहो नेति। हेतुसिद्धिं
दर्शयति देहश्चेति देहो न जीवः उत्पत्तिविनाशवत्त्वात् घटवदित्यनुमानान्तरमपि प्रेत्याह जन्मेति। कर्तृ र्द
त्वोक्तस्य जीवात्मैक्ययोगादित्यर्थः विपक्षबाधकतर्कमपि संधाय कर्त्तृत्वोऽयं इति पदद्वयं। विपक्षबाधकं स्फुटयति
अन्यथेति यदि देह एव कर्त्ता आत्मा स्यात्तर्हि तस्य विनाशित्वेन कालांतरजातफलोद्देशेन तत्तस्य कर्म
णो व्यर्थता स्यात्। इति फलहानिः। प्रत्तिनवोत्पन्नस्य देहस्यात्मत्वे तस्य परिदृश्यमानभोगजनककर्मकर्तृ
त्वासंभवाददनुष्ठितकर्मफलस्यापि प्राप्तिः स्यादित्यकृताभ्यागमः। आत्मा शरीरादिभ्यो भिन्नः तत्त्वेन प्रती
यमानत्वात् घटवदित्यनुमानान्तरमपि प्रेत्याह ममेति षष्ठ्यर्थस्य भेदगर्भितत्वात् संबंधवाचिषष्ठी
मम शरीरमिति प्रतीतिर्भिन्नस्य चात्मनः शरीराद्भेदं विषयीकरोतीति न हेत्वसिद्धिः। अथवा शरीरं ना
हमित्यात्मप्रत्ययविषयो न भवति ममेति प्रत्ययविषयत्वात् घटवदित्यनुमानमपि प्रेत्याह ममेत्यादिना।
कि आत्मत्वस्य देहधर्मसामानाधिकरण्येन देहस्यात्मत्वमुक्तं निरस्यति। स्थूलोऽहमिति यथा पुरोवर्त्तिनि र

ना

दं   आ

अद्वै टी जलतादात्म्याध्यासात्तद्धर्मेह्रदत्वस्य रजतत्वसामानाधिकरण्येन ज्ञानं तथात्मनि शरीरतादात्म्या
५८ ध्यासात्तद्धर्मत्व स्यादेः शरीरधर्मसामानाधिकरण्येन ज्ञानमित्यर्थः अत एव देहे चैतन्यप्रतीतिरप्यन्य
थासिद्धा यद्युक्तं देहान्वयव्यतिरेकौ ज्ञानस्येति तदपि न ज्ञानस्यानित्यत्वात् । अनित्यत्वेपि देहान्वयव्य
तिरेकयोरन्यथासिद्धत्वेन देहधर्मत्वासाधकत्वात् नन्वहं काण इतीन्द्रियधर्मस्य शक्तिवैकल्यरूप
काणत्वस्याहं च सामानाधिकरण्यादिन्द्रियमेव जीवात्मस्वरूपमिति चेन्नेत्याह । अत एवेति आत्मनि
काणत्वविशिष्टेन्द्रियाध्यासादित्यर्थः । अयं काण इत्यस्येन्द्रियधर्मस्यात्मनि संसर्गाध्यासादित्यर्थः ॥
ननु इन्द्रियात्मवादे काण इति प्रतीतेरनारोपितत्वं न भविष्यति प्रत्यक्षस्य बाधकबलात्सवादेन युक्तमेतदि
त्याह चक्षुषेति । इन्द्रियात्मवादे एकस्मिन् शरीरे नानात्मकत्वेन गौरवं च न च मन्मते धर्मिकल्पनागौ
रवमिति वाच्यं । तस्यात्मनस्तथाऽसिद्ध्यप्रमाणत्वेनानवकल्पकत्वादित्याह योहमिति । न चेयं प्रत्यभिज्ञा ज्ञातो
रजतादिप्रतीतिवत् । विषयाबाधादिति भावः । ननु मनो ज्ञाताऽस्त्विति मन न सोज्ञानकर्तृत्वं प्रतीतेस्तदेवात्मे
त्यत आह मनसोपीति सर्वेन्द्रियाणां युगपत्स्वस्वविषयसंबंधे सत्यपि क्रमिकज्ञानानामयानुपपत्त्या क्रमिक ५८
ज्ञानकरणतयाऽणुमनस्य मनसो ज्ञानकर्तृत्वानुपपत्तेः सात्मत्वायोगात्सिद्धौ । ननु अहंकारात्मकस्य मनसः
आत्मत्व ध्वस्तत्वस्य न स्यमाणत्वाच्च उत्पत्तिमत्त्वादपि मनो नात्माऽकल्पनमुत्पत्तिमत्त्वमित्याशंक्य तत्र क्ति

तु

तत्र

प्रमाणयति तस्मादिति यत्सत्तत्क्षणिकं संख्यात्मानुमानेन क्षणिकविज्ञानरूप आत्मेति बौद्धाभिमतं ते
से नेत्याह मिसाधबाधितप्रत्यभिज्ञाचैतन्यहान्यादिति व्यासादित्ति दूषितमित्याह नापीत्यादिना । पक्ष
चतुष्टयसाधारणदूषणमाह । सर्वेषामिति देहादीनामित्यर्थः । अन्नायादिति सुषुप्तिकाले सकलेविला
ने इति कार्यमात्रस्य जयप्रावलेनेनष्टत्वादित्यर्थः नष्टत्वेप्यात्मत्वे किं न स्यादित्याशंक्य कृतहानाकृताभ्यागम्प्रसं गम
गादिना आत्मनो नित्यत्वेन न तदानीं नवनिष्टत्वान्नित्यानित्ययोः कार्ययोगान्न तेषामात्मत्वमित्याह । आ
त्मन इति । अहंकारात्मवादमुपस्थापयति अस्त्विति देहादीत्यनेनपक्षचतुष्टयोक्तं दूषणं वारयति
स्थायित्वेन नित्यत्वं विवक्षन् तत्त्वहान्यादिदोषं व्यावर्तयति सिद्धान्तिपक्षाद्विशेषमाह कर्तोक्तो लेनिपा
रमार्थिक इति शेषः तत्र प्रमाणमाह अहंप्रत्ययगम्य इति । अहंकर्तेत्यादिप्रत्ययगम्य इत्यर्थः अविकारि
णः कूटस्थात्मनो न कर्तृत्वं नो चेत्यादिविकार इत्याह नेति अहंप्रत्ययगम्योऽनात्मा दृश्यत्वात् घटवदि
त्यनुमानादपि तस्यानात्मत्वमित्याह अहंप्रत्ययेति हेत्वसिद्धिवारणाय अहंप्रत्ययगम्यत्वं इत्युक्तं सा
क्षाद्दहंकारस्यानात्मत्वेऽनुमाने न स्वव्यतिरेक पर्यापितं साधयति यत्तद्दृश्यमिति हिमाद्रे नघटादिदृ
ष्टान्तं सूचयति । अहंकारः स्वव्यतिरिक्तदृष्टृक इति स्वविषयितानुमानविपक्षबाधकमाह तदित्येति । अहं
कारस्य स्वव्यतिरिक्तदृष्टृतावे स्वयमेव स्वस्वदृष्टेति वक्तव्यं तच्च न संभवति । स्वकर्तृकक्रियावि

प्रसाध्य

अहं·टी· षयत्वस्य स्वविषयक्रियाकर्तृत्वस्य च स्वस्मिन्नसंभवादित्यर्थः। उक्तयुक्तदृष्टांतमाह नहीति किंच। आत्म
६५ नः स्वविषयकज्ञानं प्रतिकर्तृत्वेनाप्राधान्यं विषयत्वेन च प्राधान्यमिति विरुद्धेन च तद्युक्ते एकदा एकं प्रति
एकस्य गुणत्वप्रधानत्वयोर्विरुद्धत्वादिति दूषणं नियमाच्चेति चकारेण सूचयति। अहंकारात्मवादे गु
रुमतमवलंब्य कर्तृकर्मविरोधाभावं दृष्ट्वा हेतोरसिद्धिं आशंक्य परिहरति। नापीत्यादिना। अयमाश
यः। अयं घट इति ज्ञानं हि त्रिषु संशयनिवृत्तिं करोति घटे विषयत्वेन स्वस्मिन् स्वप्रकाशत्वेन आत्मनि
स्वाश्रयत्वेन तथा चात्मनो ज्ञानविषयत्वाभावान्न पूर्वोक्तदूषणमित्यर्थः। न त्वात्मनो विषयज्ञानवि
षयत्वाभावेन दीपकवद्ज्ञानस्य स्वविषय एव संशयनिवर्तकत्वस्वाभाव्यादिति केन्नत्य यथा ज्ञानं स्वप्र
काशं स्वस्मिन् विषयत्वं विनापि संशयनिवृत्तिं करोति तथा स्वाश्रयेपि करिष्यति इत्युक्तिं प्रत्याह अवि
षयत्वं विनेवेति। विज्ञानातिरिक्तत्वे सति ज्ञानजन्यव्यवहारविषयत्वं ज्ञानविषयत्वप्रयोजकं उतज्ञा
नतदाश्रयव्यतिरिक्तत्वे सति ज्ञानजन्यव्यवहारविषयत्वं तत्प्रयोजकं इति विकल्प्याद्यं आद्यकल्पं पूर्व
मेव जघीस्याह स्वातिरिक्तेति स्वप्रकाशज्ञानजन्यव्यवहारविषये ज्ञाने व्यभिचारवारणार्थं स्वातिरि
क्तेति विशेषणं ज्ञानातिरिक्तेत्यर्थः हेत्वंतरेण परात्मिमतात्मनः स्वव्यतिरिक्तद्रष्टृकत्वं साधयति ६५
ज्ञानान्यत्वेति अहंकारः स्वव्यतिरिक्तद्रष्टृकः ज्ञानान्यत्वात्। घटवदित्यर्थः दृश्यत्वज्ञानान्यत्वहे

त्वोरसिद्धिमाशंक्य परिहरति नाप्ययमित्यादिना। अयमहंकारः दुःखादिधर्मीति हेतुगर्भं विशेषणं हेतु
मेव स्पष्टयति। अहं दुःखीति आदिपदेन सुखीत्यादिप्रत्ययग्रहः। दुःखीत्यादिप्रत्यये विशेष्यत्वेनाहंकारात्म
नो ज्ञानात्। स्वप्रकाशत्वायोगादित्यर्थः। विशिष्टप्रतीतिमन्वानं प्रत्याह अन्यथेति विशिष्टप्रत्ययाभावे दु
खादेरिति गुणितादात्म्येनैव गुणानामपरोक्षप्रतीतिरात्मविशिष्टप्रतीतेरावश्यकत्वादिति भावः। नह्यात्म
वृत्तित्वं तेषां दुःखादीनामात्मवृत्तित्वं स्वप्रकाशाहंकारसंबंधाद्वदुःखादीनामपि प्रकाशोस्त्विति चेन्नेत्या
ह नहीति नहि पितुः पांडित्ये पुत्रस्यापि तत्संबंधेन पांडित्यं जायते। ननु यथाग्नवत्त्वं स्वप्रकाशात्मसंबं धा
दहंकार तद्धर्माणां ज्ञानं तथा मम तेपि न विषयत्वाशंक्य दृष्टांतवैषम्यान्नैवमित्याह नवेति। तयो
रात्मदुःखयोः स्वप्रकाशात्मनि दुःखादेः कल्पितत्वाभेदघटितत्वात् तादात्म्यसंबंधवत्त्वात्तत्र स्वप्रकाशेन
दुःखादिप्रकाशः कल्पितस्य सत्तावदपरोक्षतायाः अधिष्ठानरूपत्वात् न तथा पारमार्थिकसंबंधवतो
संबंध्यात्मातिरिक्तः सत्ता यतः संबंधिप्रकाशेन प्रकाशः संभवतीत्यर्थः परात्मिमतात्मनोऽनात्मत्वं प्र
कारांतरेण आनयति किंचेत्यादिना। मध्यमपरिमाणत्वे अहमिहैवास्मीति देशविशिष्टावच्छिन्नतया
प्रतीयमानत्वं हेतुः। परिच्छिन्नत्वमात्रेण कथमनात्मत्वमित्याशंक्य तत्त्वज्ञो तीव्यात्मपदार्थपर्या
लोचनयेत्याह। व्यापनेति। आत्मनि परिच्छिन्नत्वप्रतीतेरन्यथासिद्धिमाशंक्य परिहरति नचेदमिति

अद्वै टी इदं ज्ञानं अहमिहैवास्मीत्यात्मनो मध्यमपरिमाणवत्त्वं गमयतीत्यर्थः। आरोपितेति। तथा च न पारमार्थि
६६ कव्यापकत्वहानिरिति भावः। कथं न बाध्यमित्याशंक्याह। आत्मनि शरीरस्य देशसत्त्वेन गृह्यमाणे ऽन्यधर्मा
रोपं किं वा प्रमाणान्तरसिद्धविभुत्ववत्यात्मनि तद्धि रूढशरीरधर्मोपचारः यथाप्रमातीकविभुत्ववत्या
उपचार: काशे घटादिगतपरिच्छेदारोप इति विकल्प्याद्यं निरस्यति। अहमनुभवविषयस्येति। आत्मन इत्यर्थः। अ
हंकारवादिनो यथा शरीरात्मत्वे भ्रमस्तु तथा बाह्यानामपि तत्संभवेन देहाद्यतिरिक्तात्मनि नैव वा
हं न कुर्युरित्यर्थः। द्वितीयं दूषयति। अहमनुभवेति। अहंकारस्य त्वदीयात्मनः इत्थं मध्यमपरिमाण
त्वं आत्मा विभुः अण्वन्यत्वे सति नित्यद्रव्यत्वात्। आकाशादिवदित्यनुमानेन विभुत्वं सिद्धमिति प्र
माणान्तरावसिद्ध इत्याशंक्याह धर्मिग्राहकेति धर्मिग्राहकप्रमाणं अहमिहैवेति परिच्छिन्नत्वग्रा
हकं प्रमाणं ननु जीवादृष्टजन्याः पदार्थाः द्वीपान्तरादौ सर्वे ऽस्पद्यंते सा चोत्पत्तिरदृष्टसंबंधं विना
न संभवति जन्योत्पत्तिदेशे जनकसंबंधनियमात्। न हि घटोत्पत्तिदेशे असंबद्धो दंडो घटं जनयति त
था चादृष्टस्य देशान्तरेण संबंधान्तरासंभवेन स्वाश्रयद्वारैव संबंधो ~~दंडो घटं जनयति तथा चाद~~
~~दृष्टस्य देशान्तरेण संबंधान्तरासंभवेन स्वाश्रयद्वारैव संबंधो~~ वक्तव्य इति सिद्धमात्मनः सर्वदेश
संयोगित्वरूपविभुत्वं तथा च देशान्तरे आत्मनोऽप्यपदार्थोत्पत्त्यन्यथानुपपत्तितर्कसहकारपूर्वो ६६

रूपविभुत्वानुमानेन धर्मिग्राहकप्रमाणबाध इति चेन्न कार्योत्पत्तिदेशे कारणसंबंधस्य व्यभिचारित्वात्। जीव
योगजनककालादेशोत्पत्तौ अस्तु तिनिंदादिशब्दजनकादृष्टे कार्यदेशसंबंधाभावात् विभ्वोः पदार्थयोः अजन्य
संयोगस्य परैर्निराकरणात् शब्दाधाराकाशेनादृष्टवदात्मनः संयोगाभावादित्याह आकाश इति। अ
दृष्टजन्यकार्यस्योत्पत्तिदेशे दृष्टसंबंधं विनाप्युत्पत्तौ स्तुतिनिंदाशब्दस्येति दृष्टान्तः। तद्दृष्टं जीवादृष्टं।
अन्यथोपपन्नत्वेन अदृष्टसंबंधं विनाप्युपपन्नत्वेनेत्यर्थः। एतेन विभुत्वानुमानस्य तर्कसहकारोऽपि नि
रस्तः स्वरूपसंबंधवादिनस्तव देशान्तरेणापि अदृष्टस्य संबंधसंभवाच्च न तदर्थमात्मनो विभुत्वं वक्तव्य
मिति भावः। अहंकारस्यानात्मत्वे साधिते उपसंहरन् शोधितत्वंपदार्थमाह तस्मादिति। यस्मादुक्तवि
धया हंकारस्यात्मत्वं न संभवति तस्मादित्यर्थः। अनात्मा योऽहंकारस्तस्य साक्षी आत्मा इति शोधित
त्वंपदार्थोक्तिः यत्तद्रूपमित्यादिना निरस्तं साक्षित्वेन सामान्येदं सदृष्टान्तमनुवदति तत इति। अ
हंकारादित्यर्थः। एवं देहादिभ्यो विवेचितस्यात्मनः तस्य द्वैतप्रसक्तेर्द्योत्यतो दर्शयितुं भूमिकां रचयति
स यच्चेत्यादिना दृश्यत्वाभावेन रसगंधवत्तु ... चापत्तिं शंकते किंचिदिति दृश्यत्वाभावस्तु ... प्रयोज प्रो॰
कः दृश्यभिन्नस्यापि तुच्छत्वात् वक्तृस्वप्रकाशापदार्थस्य संभवादित्याह। दृग्रूप इति। ननु सत्तिविनाशव नित्यं
तो ज्ञाने न्यः कथमेकस्यात्मनो नेह इत्याधुनिकाय मेच हुत्वादिजन्यज्ञानानातिरिक्तं भीत्मानेदयोग्या

अद्वै. टी

(५)

ज्ञानं प्रकृत्या साधयति तथा हीत्यादिना। अहंकारधर्मा इत्यादिना पूर्वोक्तदोषः परिहृतः। अहंकारधर्म
श्चक्षुरादिजन्यो ज्ञानत्ववत् ज्ञानमात्रवृत्त्यापि वस्तुतो न ज्ञानमिति पराभिमतादित्यनेन सूचयति ननु
दृष्टेर्ज्ञानस्य देशान्तरं तद्विषयकदृष्टिकर्तारं न पृथक्पश्येत् स्वार्थकप्रकाशात् कथमस्य ज्ञानं ज्ञानं सिद्ध्यतीत्याशं
क्याह स्वयं स्फुरयति तत्र हीति तत्र अज्ञातो दृष्टुर्दृष्टिरूपत्वाभावे बाधकमाह अन्यथेति दृष्टा नाम प्रकाशो
पादानं नहि स्वयमप्रकाशः परप्रकाशं जनयति उपादानोपादेययोः समानजातीयत्वायोगात्। प्र
दीपादिप्रकाशे तथा दृष्टेः परं तु प्रदीपादिस्तमोनिवर्तको भौतिकः प्रकाशः अयं तु अविद्यानिवर्तक
श्चैतन्यप्रकाश इति विशेषः ननु दृष्टिरूपे तस्मिन् दर्शनाश्रयवाचि दृष्टृशब्दः प्रयोगः कथमिति
चेत् उच्यते एकमेव चैतन्यं विषयावच्छिन्नं दृष्टिशब्दवाच्यं स्वरूपेण चैतदाश्रयत्वात् दृष्टेत्युच्य
ते सोपाधिरूपस्य निरुपाध्याश्रयत्वात् महाकाशघटाकाशयोराश्रयाश्रयित्वाभावस्य दृष्टत्वादिति
किं च यदि दृष्टा न दृष्टिरूपः किं तु जडः स स्वसमवेतदर्शनेन घटादिदृष्टिं स्वात्मानं च प्रकाशयति
तर्हि तस्यां स्वसमवेतदृष्टौ करणं निरूपणीयं तच्चाशंक्यमित्याह। अहंकारभावेनेति वृत्तितदाश्रय ५८
विषयकज्ञानकारणत्वाभावेनापि सिद्धेः ननु त्रयविषयकज्ञानं नोपपद्यते सर्वपरामृष्टकरणाभा
वाशंक्य निराकरोति मनस इति उपादानस्येति हेतुगर्भं विशेषणं। घटाद्युपादानस्य मृदादेः त ५९

त्कारणत्वादृष्टेरित्यर्थः मनसो ज्ञानकारणत्वग्राहकं प्रमाणमुपन्यस्य दूषयति मनसेति आ
त्मनो मनःकरणकज्ञानोपादानत्वं मनसा पश्यतीति श्रुतेर्न विषयः निर्विकारस्यात्मनो ज्ञान
परिणामायोगात् निरवयवे आत्मनि ज्ञानजनकव्यापारवृत्तिमनःसंयोगासंभवाच्च। किं तु मनो
धर्मेण मनःपरिणामेन ज्ञानेन वृत्तिरूपेण आत्मनोऽहंकारातिरिक्तात्मना आरोपितं दृष्टृत्वं दृ
ष्टृत्वाध्यासविषयत्वं इति यावत् यथा कुसुमलौहित्येन स्फटिकस्य लौहित्याध्यासविषयत्वं तद्व
दित्यर्थः। तथा च मनःकरणत्वे इयं श्रुतिर्न प्रमाणमिति भावः। ननु श्रुतिरारोपितकर्तृत्वपरा चे
न्मनसेति तृतीयानुपपत्तिरिति चेत्। नैवं वर्णितं अस्य श्रुत्यर्थानुसारेण आत्मनि ज्ञानकर्तृत्वाध्या
से मनसो निमित्तत्वात् तदुपपत्तेरित्याह तत्र चेति ननु मनो न करणमिति तु किं धर्मिग्राहकप्रमाण
विरुद्धं तथा हि सर्वेन्द्रियाणां विषयसंनिधाने युगपत् सर्वज्ञानोत्पत्तिप्राप्तौ क्रमकारि सर्वज्ञान
करणं मनः कल्प्यते तस्य यस्मिन्निन्द्रिये मनः संबद्धं तेनैवेन्द्रियेण मनोरूपकरणान्तरसहकृतेन
स्वविषयविषयकं ज्ञानं जन्यते नान्येनेति नाकरणं मन इति चेन्न युगपज्ज्ञानानुत्पत्तेरन्यथा
प्युपपादयितुं शक्यत्वेन मनःकरणत्वानुपपादकत्वात्। तथा हि धर्मिकल्पनातो धर्मकल्पना ला
घवेन ज्ञानोपादानीभूतात्मन्येव क्रमजननशक्तिः कल्प्यतां किं नेन सा न तु तथापि नियतक्रमेणो

म

अ॰ दी॰ हेतुः उच्यते ॥ अदृष्टमेव मनसो नियतेंद्रियसंबंधे पितवाप्यदृष्टातिरिक्तकारणाभावात् किंच ॥ अणो
मनोवाग्दिना संयुक्तस्यैव मनसः करणत्वं वक्तव्यं ॥ अन्यथातिप्रसंगात्

५८

५८